# अथ षष्ठं मण्डलम्
## प्रथमोऽनुवाकः
## सू० १-१५

### (१) प्रथमं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः

त्वं ह्यग्ने प्रथमो मनोता ऽस्या धियो अभवो दस्म होता ।
त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै १
अधा होता न्यसीदो यजीया निळस्पद इषयन्नीड्यः सन् ।
तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनु ग्मन् २
वृतेव यन्तं बहुभिर्वसव्यै३ स्त्वे रयिं जागृवांसो अनु ग्मन् ।
रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसम् ३
पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम् ।
नामानि चिद् दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ४
त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां राय उभयासो जनानाम् ।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम् ५
सपर्येण्यः स प्रियो विक्ष्व१ग्नि र्होता मन्द्रो नि षसादा यजीयान् ।
तं त्वा वयं दम आ दीदिवांस मुप ज्ञुबाधो नमसा सदेम ६
तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे देवयन्तः ।
त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ७
विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम् ।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम् ८
सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम् ।
य आहुतिं परि वेदा नमोभिर्विश्वेत् स वामा दधते त्वोतः ९
अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः ।
वेदी सूनो सहसो गीर्भिरुक्थै रा ते भद्रायां सुमतौ यतेम १०
आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्य१स्तरुत्रः ।
बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि ११
नृवद् वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः ।

पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु १२
पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन् वसुता ते अश्याम् ।
पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे १३

पञ्चमोऽध्यायः

व० १-३०

(२) द्वितीयं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता ।
(१-१०) प्रथमादिदशर्चामनुष्टुप्, (११) एकादश्याश्च शक्वरी छन्दसी

त्वं हि क्षैतवद् यशो ऽग्ने मित्रो न पत्यसे ।
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि १
त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते ।
त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः २
सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिन्धते ।
यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे ३
ऋधद् यस्ते सुदानवे धिया मर्तः शशमते ।
ऊती ष बृहतो दिवो द्विषो अंहो न तरति ४
समिधा यस्त आहुतिं निशितिं मर्त्यो नशत् ।
वयावन्तं स पुष्यति क्षयमग्ने शतायुषम् ५
त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः ।
सूरो न हि द्युता त्वं कृपा पावक रोचसे ६
अधा हि विक्ष्वीड्यो ऽसि प्रियो नो अतिथिः ।
रण्वः पुरीव जूर्यः सूनुर्न त्रययाय्यः ७
क्रत्वा हि द्रोणे अज्यसे ऽग्ने वाजी न कृत्व्यः ।
परिज्मेव स्वधा गयो ऽत्यो न ह्वार्यः शिशुः ८
त्वं त्या चिदच्युता ऽग्ने पशुर्न यवसे ।
धामा ह यत् ते अजर वना वृश्चन्ति शिक्वसः ९
वेषि ह्यध्वरीयतामग्ने होता दमे विशां ।
समृधो विश्पते कृणु जुषस्व हव्यमङ्गिरः १०
अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।

वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि
दुरिता तरेम ता तरेम तवावसा तरेम ११

(३) तृतीयं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः

अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे ।
यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः १
ईजे यज्ञेभिः शशमे शमीभिर्ऋधद्वारायाग्नये ददाश ।
एवा चन तं यशसामजुष्टिर्नांहो मर्तं नशते न प्रदृप्तिः २
सूरो न यस्य दृशतिररेपा भीमा यदेति शुचतस्त आ धीः ।
हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः ३
तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यमसान आसा ।
विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत् ४
स इदस्तेव प्रति धादसिष्यञ्छिशीत तेजोऽयसो न धाराम् ।
चित्रध्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः ५
स ईं रेभो न प्रति वस्त उस्राः शोचिषा रारपीति मित्रमहाः ।
नक्तं य ईमरुषो यो दिवा नॄनमर्त्यो अरुषो यो दिवा नॄन् ६
दिवो न यस्य विधतो नवीनोद्वृषा रुक्ष ओषधीषु नूनोत् ।
घृणा न यो ध्रजसा पत्मना यन्ना रोदसी वसुना दं सुपत्नी ७
धायोभिर्वा यो युज्येभिरर्कैर्विद्युन्न दविद्योत्स्वेभिः शुष्मैः ।
शर्धो वा यो मरुतां ततक्ष ऋभुर्न त्वेषो रभसानो अद्यौत् ८

(४) चतुर्थं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः

यथा होतर्मनुषो देवताता यज्ञेभिः सूनो सहसो यजासि ।
एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् १
स नो विभावा चक्षणिर्न वस्तोरग्निर्वन्दारु वेद्यश्चनो धात् ।
विश्वायुर्यो अमृतो मर्त्येषूषर्भुद्भूदतिथिर्जातवेदाः २

द्यावो न यस्य पनयन्त्यभ्वं भासांसि वस्ते सूर्यो न शुक्रः ।
वि य इनोत्यजरः पावको ऽश्नस्य चिच्छिश्नथत् पूर्व्याणि ३
वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषाज्मान्नम् ।
स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः ४
नितिक्ति यो वारणमन्नमत्ति वायुर्न राष्ट्र्यत्येत्यक्तून् ।
तुर्याम यस्त आदिशामरातीरत्यो न ह्रुतः पततः परिह्रुत् ५
आ सूर्यो न भानुमद्भिरर्कै रग्ने ततन्थ रोदसी वि भासा ।
चित्रो नयत् परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन् ६
त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ७
नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः ।
ता सूरिभ्यो गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः ८

## (५) पञ्चमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता ।
त्रिष्टुप् छन्दः

हुवे वः सूनुं सहसो युवान मद्रोघवाचं मतिभिर्यविष्ठम् ।
य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक् १
त्वे वसूनि पुर्वणीक होत र्दोषा वस्तोरेरिरे यज्ञियासः ।
क्षामेव विश्वा भुवनानि यस्मिन् त्सं सौभगानि दधिरे पावके २
त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणाम् ।
अत इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि ३
यो नः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात् ।
तमजरेभिर्वृषभिस्तव स्वै स्तपा तपिष्ठ तपसा तपस्वान् ४
यस्ते यज्ञेन समिधा य उक्थै रर्केभिः सूनो सहसो ददाशत् ।
स मर्त्येष्वमृत प्रचेता राया द्युम्नेन श्रवसा वि भाति ५
स तत् कृधीषितस्तूयमग्ने स्पृधो बाधस्व सहसा सहस्वान् ।
यच्छस्यसे द्युभिरक्तो वचोभि स्तज्जुषस्व जरितुर्घोषि मन्म ६
अश्याम तं काममग्ने तवोती अश्याम रयिं रयिवः सुवीरम् ।
अश्याम वाजमभि वाजयन्तो ऽश्याम द्युम्नमजराजरं ते ७

(६) षष्ठं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता ।
त्रिष्टुप् छन्दः

प्र नव्यसा सहसः सूनुमच्छा यज्ञेन गातुमव इच्छमानः ।
वृश्चद्वनं कृष्णयामं रुशन्तं वीती होतारं दिव्यं जिगाति १
स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः ।
यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन् २
वि ते विष्वग्वातजूतासो अग्ने भामासः शुचे शुचयश्चरन्ति ।
तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः ३
ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपन्ति विषितासो अश्वाः ।
अध भ्रमस्त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः ४
अध जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना ।
शूरस्येव प्रसितिः क्षातिरग्ने दुर्वर्तुर्भीमो दयते वनानि ५
आ भानुना पार्थिवानि ज्रयांसि महस्तोदस्य धृषता ततन्थ ।
स बाधस्वाप भया सहोभिः स्पृधो वनुष्यन् वनुषो नि जूर्व ६
स चित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।
चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्र चन्द्राभिर्गृणते युवस्व ७

(७) सप्तमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । वैश्वानरोऽग्निर्देवता ।
(१-५) प्रथमादिपञ्चर्चां त्रिष्टुप्, (६-७) षष्ठीसप्तम्योश्च जगती छन्दसी

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनाना मासन्ना पात्रं जनयन्त देवाः १
नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त ।
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः २
त्वद् विप्रो जायते वाज्यग्ने त्वद् वीरासो अभिमातिषाहः ।
वैश्वानर त्वमस्मासु धेहि वसूनि राजन् त्स्पृहयाय्याणि ३
त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिरमृतत्वमायन् वैश्वानर यत् पित्रोरदीदेः ४

वैश्वानर तव तानि व्रतानि महान्यग्ने नकिरा दधर्ष ।
यज्जायमानः पित्रोरुपस्थे ऽविन्दः केतुं वयुनेष्वह्नाम् ५
वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना ।
तस्येदु विश्वा भुवनाधि मूर्धनि वया इव रुरुहुः सप्त विस्रुहः ६
वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः ।
परि यो विश्वा भुवनानि पप्रथे ऽदब्धो गोपा अमृतस्य रक्षिता ७

## (८) अष्टमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । वैश्वानरोऽग्निर्देवता ।
(१-६) प्रथमादितृचद्वयस्य जगती, (७) सप्तम्या ऋचश्च त्रिष्टुप् छन्दसी

पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नु वोचं विदथा जातवेदसः ।
वैश्वानराय मतिर्नव्यसी शुचिः सोम इव पवते चारुरग्नये १
स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत ।
व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत् २
व्यस्तभ्नाद् रोदसी मित्रो अद्भुतो ऽन्तर्वावदकृणोज्ज्योतिषा तमः ।
वि चर्मणीव धिषणे अवर्तयद् वैश्वानरो विश्वमधत्त वृष्ण्यम् ३
अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुर्ऋग्मियम् ।
आ दूतो अग्निमभरद् विवस्वतो वैश्वानरं मातरिश्वा परावतः ४
युगेयुगे विदथ्यं गृणद्भ्यो ऽग्ने रयिं यशसं धेहि नव्यसीम् ।
पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा ५
अस्माकमग्ने मघवत्सु धारया ऽनामि क्षत्रमजरं सुवीर्यम् ।
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ६
अदब्धेभिस्तव गोपाभिरिष्टे ऽस्माकं पाहि त्रिषधस्थ सूरीन् ।
रक्षा च नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः ७

## (९) नवमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । वैश्वानरोऽग्निर्देवता ।
त्रिष्टुप् छन्दः

अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजा ऽवातिरज्ज्योतिषाग्निस्तमांसि १

नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः ।
कस्य स्वित् पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा २
स इत् तन्तुं स वि जानात्योतुं स वक्त्वान्यृतुथा वदाति ।
य ईं चिकेतदमृतस्य गोपा अवश्चरन् परो अन्येन पश्यन् ३
अयं होता प्रथमः पश्यतेम मिदं ज्योतिरमृतं मर्त्येषु ।
अयं स जज्ञे ध्रुव आ निषत्तो ऽमर्त्यस्तन्वा३ वर्धमानः ४
ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः ।
विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यन्ति साधु ५
वि मे कर्णा पतयतो वि चक्षु र्वीइदं ज्योतिर्हृदय आहितं यत् ।
वि मे मनश्चरति दूरआधीः किं स्विद् वक्ष्यामि किमु नू मनिष्ये ६
विश्वे देवा अनमस्यन् भियाना स्त्वामग्ने तमसि तस्थिवांसम् ।
वैश्वानरोऽवतूतये नो ऽमर्त्योऽवतूतये नः ७

(१०) दशमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । (१-६) प्रथमादितृचद्वयस्य त्रिष्टुप्, (७) सप्तम्या ऋचश्च द्विपदा विराट् छन्दसी

पुरो वो मन्द्रं दिव्यं सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे दधिध्वम् ।
पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः १
तमु द्युमः पुर्वणीक होत रग्ने अग्निभिर्मनुष इधानः ।
स्तोमं यमस्मै ममतेव शूषं घृतं न शुचि मतयः पवन्ते २
पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः ।
चित्राभिस्तमूतिभिश्चित्रशो चिर्व्रजस्य साता गोमतो दधाति ३
आ यः पप्रौ जायमान उर्वी दूरेदृशा भासा कृष्णाध्वा ।
अध बहु चित् तम ऊर्म्याया स्तिरः शोचिषा ददृशे पावकः ४
नू नश्चित्रं पुरुवाजाभिरूती अग्ने रयिं मघवद्भ्यश्च धेहि ।
ये राधसा श्रवसा चात्यन्यान् त्सुवीर्येभिश्चाभि सन्ति जनान् ५
इमं यज्ञं चनो धा अग्न उशन् यं त आसानो जुहुते हविष्मान् ।
भरद्वाजेषु दधिषे सुवृक्ति मवीर्वाजस्य गध्यस्य सातौ ६
वि द्वेषांसीनुहि वर्धयेळां मदेम शतहिमाः सुवीराः ७

(११) एकादशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता ।
त्रिष्टुप् छन्दः

यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां न प्रयुक्ति ।
आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी ववृत्याः १
त्वं होता मन्द्रतमो नो अध्रुगन्तर्देवो विदथा मर्त्येषु ।
पावकया जुह्वा३ वह्निरासा ऽग्ने यजस्व तन्वं१ तव स्वाम् २
धन्या चिद्धि त्वे धिषणा वष्टि प्र देवाञ्जन्म गृणते यजध्यै ।
वेपिष्ठो अङ्गिरसां यद्ध विप्रो मधु च्छन्दो भनति रेभ इष्टौ ३
अदिद्युतत् स्वपाको विभावा ऽग्ने यजस्व रोदसी उरूची ।
आयुं न यं नमसा रातहव्या अञ्जन्ति सुप्रयसं पञ्च जनाः ४
वृञ्जे ह यन्नमसा बर्हिरग्ना वयामि स्रुग्घृतवती सुवृक्तिः ।
अम्यक्षि सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः ५
दशस्या नः पुर्वणीक होतर्देवेभिरग्ने अग्निभिरिधानः ।
रायः सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः ६

(१२) द्वादशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता ।
त्रिष्टुप् छन्दः

मध्ये होता दुरोणे बर्हिषो राळग्निस्तोदस्य रोदसी यजध्यै ।
अयं स सूनुः सहस ऋतावा दूरात् सूर्यो न शोचिषा ततान १
आ यस्मिन् त्वे स्वपाके यजत्र यक्षद् राजन् त्सर्वतातेव नु द्यौः ।
त्रिषधस्थस्ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै २
तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन् न वृधसानो अद्यौत् ।
अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु ३
सास्माकेभिरेतरी न शूषैरग्निः ष्टवे दम आ जातवेदाः ।
द्रवन्नो वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः ४
अध स्मास्य पनयन्ति भासो वृथा यत् तक्षदनुयाति पृथ्वीम् ।
सद्यो यः स्पन्द्रो विषितो धवीयानृणो न तायुरति धन्वा राट् ५
स त्वं नो अर्वन् निदाया विश्वेभिरग्ने अग्निभिरिधानः ।

वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः ६

(१३) त्रयोदशं सूक्तम्
(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता ।
त्रिष्टुप् छन्दः

त्वद् विश्वा सुभग सौभगा न्यग्ने वि यन्ति वनिनो न वयाः ।
श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपाम् १
त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चाः ।
अग्ने मित्रो न बृहत ऋतस्या ऽसि क्षत्ता वामस्य देव भूरेः २
स सत्पतिः शवसा हन्ति वृत्र मग्ने विप्रो वि पणेर्भर्ति वाजम् ।
यं त्वं प्रचेत ऋतजात राया सजोषा नप्त्रापां हिनोषि ३
यस्ते सूनो सहसो गीर्भिरुक्थै र्यज्ञैर्मर्तो निशितिं वेद्यानट् ।
विश्वं स देव प्रति वारमग्ने धत्ते धान्यं१ पत्यते वसव्यैः ४
ता नृभ्य आ सौश्रवसा सुवीरा ऽग्ने सूनो सहसः पुष्यसे धाः ।
कृणोषि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये ५
वद्मा सूनो सहसो नो विहाया अग्ने तोकं तनयं वाजि नो दाः ।
विश्वाभिर्गीर्भिरभि पूर्तिमश्यां मदेम शतहिमाः सुवीराः ६

(१४) चतुर्दशं सूक्तम्
(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । (१-५)
प्रथमादिपञ्चर्चामनुष्टुप् (६) षष्ठ्या ऋचश्च शक्वरी छन्दसी

अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः ।
भसन्नु ष प्र पूर्व्य इषं वुरीतावसे १
अग्निरिद्धि प्रचेता अग्निर्वेधस्तम ऋषिः ।
अग्निं होतारमीळते यज्ञेषु मनुषो विशः २
नाना ह्य१ग्नेऽवसे स्पर्धन्ते रायो अर्यः ।
तूर्वन्तो दस्युमायवो व्रतैः सीक्षन्तो अव्रतम् ३
अग्निरप्सामृतीषहं वीरं ददाति सत्पतिम् ।
यस्य त्रसन्ति शवसः संचक्षि शत्रवो भिया ४
अग्निर्हि विद्मना निदो देवो मर्तमुरुष्यति ।

सहावा यस्यावृतो रयिर्वाजेष्ववृतः ५
अच्छा नो मित्रमहो देव देवा नग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन्
द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ६

(१५) पञ्चदशं सूक्तम्

(१-१९) एकोनविंशत्यृचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज आङ्गिरसो वीतहव्यो वा ऋषिः । अग्निर्देवता । (१-२, ४-५, ७-९)
प्रथमाद्वितीययोर्ऋचोश्चतुर्थीपञ्चम्योः सप्तमीनवम्योश्च जगती, (३, १५)
तृतीयापञ्चदश्योः शक्वरी, (६) षष्ठ्या अतिशक्वरी, (१०-१४, १६, १९)
दशम्यादिपञ्चानां षोडश्या एकोनविंश्याश्च त्रिष्टुप्, (१७) सप्तदश्या अनुष्टुप्, (१८)
अष्टादश्याश्च बृहती छन्दांसि

इममू षु वो अतिथिमुषर्बुधं विश्वासां विशां पतिमृञ्जसे गिरा ।
वेतीद् दिवो जनुषा कच्चिदा शुचि र्ज्योक् चिदत्ति गर्भो यदच्युतम् १
मित्रं न यं सुधितं भृगवो दधु र्वनस्पतावीड्यमूर्ध्वशोचिषम् ।
स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर्महयसे दिवेदिवे २
स त्वं दक्षस्यावृको वृधो भू रर्यः परस्यान्तरस्य तरुषः ।
रायः सूनो सहसो मर्त्येष्वा छर्दिर्यच्छ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः
३
द्युतानं वो अतिथिं स्वर्णर मग्निं होतारं मनुषः स्वध्वरम् ।
विप्रं न द्युक्षवचसं सुवृक्तिभि र्हव्यवाहमरतिं देवमृञ्जसे ४
पावकया यश्चितयन्त्या कृपा क्षामन् रुरुच उषसो न भानुना ।
तूर्वन् न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ५
अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणि ।
उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि
नो दुवः ६
समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् ७
त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम् ।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ८

विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे ।
यत् ते धीतिं सुमतिमावृणीमहे ऽध स्मा नस्त्रिवरूथः शिवो भव ९
तं सुप्रतीकं सुदृशं स्वञ्च मविद्वांसो विदुष्टरं सपेम ।
स यक्षद् विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत् १०
तमग्ने पास्युत तं पिपर्षि यस्त आनट् कवये शूर धीतिम् ।
यज्ञस्य वा निशितिं वोदितिं वा तमित् पृणक्षि शवसोत राया ११
त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात् ।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री १२
अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः ।
देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा १३
अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्ट्वं हि यज्वा ।
ऋता यजासि महिना वि यद् भू र्हव्या वह यविष्ठ या ते अद्य १४
अभि प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै ।
अवा नो मघवन् वाजसाता वग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम १५
अग्ने विश्वेभिः स्वनीक देवै रूर्णावन्तं प्रथमः सीद योनिम् ।
कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधु १६
इममु त्यमथर्ववद् दग्निं मन्थन्ति वेधसः । यमङ्कूयन्तमानय न्नमूरं श्याव्याभ्यः १७
जनिष्वा देववीतये सर्वताता स्वस्तये ।
आ देवान् वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः १८
वयमु त्वा गृहपते जनाना मग्ने अकर्म समिधा बृहन्तम् ।
अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस्तेजसा सं शिशाधि १९
द्वितीयोऽनुवाकः
सू० १६ ।२३

(१६) षोडशं सूक्तम्

(१-४८) अष्टचत्वारिंशदृचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । (१, ६) प्रथमाषष्ठ्योर्ऋचोर्वर्धमाना, (२-५, ७-२६, २८-४५) द्वितीयादिचतसृणां सप्तम्यादिविंशतेरष्टाविंश्याद्यष्टादशानाञ्च गायत्री, (२७, ४७-

४८) सप्तविंश्याः सप्तचत्वारिंश्यष्टचत्वारिंश्योश्चानुष्टुप्, (४६) षट्चत्वारिंश्याश्च त्रिष्टुप् छन्दांसि

त्वमग्ने यज्ञानां होता विश्वेषां हितः । देवेभिर्मानुषे जने १
स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः । आ देवान् वक्षि यक्षि च २
वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा । अग्ने यज्ञेषु सुक्रतो ३
त्वामीळे अध द्विता भरतो वाजिभिः शुनम् । ईजे यज्ञेषु यज्ञियम् ४
त्वमिमा वार्या पुरु दिवोदासाय सुन्वते । भरद्वाजाय दाशुषे ५
त्वं दूतो अमर्त्य आ वहा दैव्यं जनम् । शृण्वन् विप्रस्य सुष्टुतिम् ६
त्वामग्ने स्वाध्यो३ मर्तासो देववीतये । यज्ञेषु देवमीळते ७
तव प्र यक्षि संदृश मुत क्रतुं सुदानवः । विश्वे जुषन्त कामिनः ८
त्वं होता मनुर्हितो वह्निरासा विदुष्टरः । अग्ने यक्षि दिवो विशः ९
अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि १०
तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य ११
स नः पृथु श्रवाय्य मच्छा देव विवाससि । बृहदग्ने सुवीर्यम् १२
त्वामग्ने पुष्करादध्य थर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः १३
तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरंदरम् १४
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनंजयं रणेरणे १५
एह्यू षु ब्रवाणि ते ऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः १६
यत्र क्व च ते मनो दक्षं दधस उत्तरम् । तत्रा सदः कृणवसे १७
नहि ते पूर्तमक्षिपद् भुवन्नेमानां वसो । अथा दुवो वनवसे १८
आग्निरगामि भारतो वृत्रहा पुरुचेतनः । दिवोदासस्य सत्पतिः १९
स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना । वन्वन्नवातो अस्तृतः २०
स प्रत्नवन्नवीयसा ऽग्ने द्युम्नेन संयता । बृहत् ततन्थ भानुना २१
प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया । अर्च गाय च वेधसे २२
स हि यो मानुषा युगा सीदद्धोता कविक्रतुः । दूतश्च हव्यवाहनः २३
ता राजाना शुचिव्रता ऽऽदित्यान् मारुतं गणम् । वसो यक्षीह रोदसी २४
वस्वी ते अग्ने संदृष्टि रिषयते मर्त्याय । ऊर्जो नपादमृतस्य २५
क्रत्वा दा अस्तु श्रेष्ठो ऽद्य त्वा वन्वन् त्सुरेक्णाः । मर्त आनाश सुवृक्तिम् २६
ते ते अग्ने त्वोता इषयन्तो विश्वमायुः । तरन्तो अर्यो अराती र्वन्वन्तो अर्यो

अरा॑तीः २७
अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा॒ यास॒द् विश्वं॒ न्य१॒॑त्रिण॑म् । अ॒ग्निर्नो॑ वनते र॒यिम् २८
सु॒वीरं॑ र॒यिमा भ॑र॒ जात॑वेदो॒ विच॑र्षणे । ज॒हि रक्षां॑सि सुक्रतो २९
त्वं नः॑ पा॒ह्यंह॑सो॒ जात॑वेदो अघाय॒तः । रक्षा॑ णो ब्रह्मणस्कवे ३०
यो नो॑ अग्ने दु॒रेव॒ आ मर्तो॑ व॒धाय॒ दाश॑ति । तस्मा॑न्नः पा॒ह्यंह॑सः ३१
त्वं तं दे॑व जि॒ह्वया॒ परि॑ बाधस्व दु॒ष्कृत॑म् । मर्तो॒ यो नो॒ जिघां॑सति ३२
भ॒रद्वा॑जाय स॒प्रथः॒ शर्म॑ यच्छ सहन्त्य । अग्ने॒ वरे॑ण्यं॒ वसु॑ ३३
अ॒ग्निर्वृ॒त्राणि॑ जङ्घनद् द्रविण॒स्युर्वि॑प॒न्यया॑ । समि॑द्धः शु॒क्र आहु॑तः ३४
गर्भे॑ मा॒तुः पि॒तुष्पि॒ता वि॑दिद्यु॒ता॒नो अ॒क्षरे॑ । सीद॑न्नृ॒तस्य॒ योनि॒मा ३५
ब्रह्म॑ प्र॒जाव॒दा भ॑र॒ जात॑वेदो॒ विच॑र्षणे । अग्ने॒ यद् दी॒दय॑द् दि॒वि ३६
उप॑ त्वा र॒ण्वसं॑दृशं॒ प्रय॑स्वन्तः सहस्कृत । अग्ने॑ ससृ॒ज्महे॒ गिरः॑ ३७
उप॑ च्छा॒यामि॑व॒ घृणे॒ रग॑न्म॒ शर्म॑ ते व॒यम् । अग्ने॒ हिर॑ण्यसंदृशः ३८
य उ॒ग्र इ॑व शर्य॒हा ति॒ग्मशृ॑ङ्गो॒ न वंस॑गः । अग्ने॒ पुरो॑ रु॒रोजि॑थ ३९
आ यं हस्ते॒ न खा॒दिन॒ं शिशुं॑ जा॒तं न बिभ्र॑ति । वि॒शाम॒ग्निं स्व॑ध्व॒रम् ४०
प्र दे॒वं दे॒ववी॑तये॒ भर॑ता वसु॒वित्त॑मम् । आ स्वे योनौ॒ नि षी॑दतु ४१
आ जा॒तं जा॒तवे॑दसि प्रि॒यं शि॑शी॒ताति॑थिम् । स्यो॒न आ गृ॒हप॑तिम् ४२
अग्ने॑ यु॒क्ष्वा हि ये तवाऽश्वा॑सो देव सा॒धवः॑ । अरं॒ वह॑न्ति म॒न्यवे॑ ४३
अच्छा॑ नो या॒ह्या व॑हा॒ऽभि प्रयां॑सि वी॒तये॑ । आ दे॒वान् त्सोम॑पीतये ४४
उद॑ग्ने भारत द्यु॒मदज॑स्रेण॒ दवि॑द्युतत् । शोचा॒ वि भा॑ह्यजर ४५
वी॒ती यो दे॒वं मर्तो॑ दुव॒स्येद॒ग्निमी॑ळीताध्व॒रे ह॒विष्मा॑न् ।
होता॑रं सत्य॒यजं॒ रोद॑स्योरुत्ता॒नह॑स्तो॒ नम॒सा वि॑वासेत् ४६
आ ते॑ अग्न ऋ॒चा ह॒विर्हृ॒दा त॒ष्टं भ॑रामसि ।
ते ते॑ भवन्तू॒क्षण॑ ऋष॒भासो॑ व॒शा उ॒त ४७
अ॒ग्निं दे॒वासो॑ अग्नि॒यमि॒न्धते॑ वृत्र॒हन्त॑मम् ।
येना॒ वसू॒न्याभृ॑ता तृ॒ळ्हा रक्षां॑सि वा॒जिना॑ ४८

षष्ठोऽध्यायः
व० १-२५

(१७) सप्तदशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।
(१-१४) प्रथमादिचतुर्दशर्चां त्रिष्टुप्, (१५) पञ्चदश्याश्च द्विपदा त्रिष्टुप् छन्दसी

पिबा सोममभि यमुग्र तर्द ऊर्वं गव्यं महि गृणान इन्द्र ।
वि यो धृष्णो वधिषो वज्रहस्त विश्वा वृत्रममित्रिया शवोभिः १
स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान् वृषभो यो मतीनाम् ।
यो गोत्रभिद् वज्रभृद् यो हरिष्ठाः स इन्द्र चित्राँ अभि तृन्धि वाजान् २
एवा पाहि प्रत्नथा मन्दतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः ।
आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इन्द्र तृन्धि ३
ते त्वा मदा बृहदिन्द्र स्वधाव इमे पीता उक्षयन्त द्युमन्तम् ।
महामनूनं तवसं विभूतिं मत्सरासो जर्हृषन्त प्रसाहम् ४
येभिः सूर्यमुषसं मन्दसानोऽवासयोऽप दृळहानि दर्द्रत् ।
महामद्रिं परि गा इन्द्र सन्तं नुत्था अच्युतं सदसस्परि स्वात् ५
तव क्रत्वा तव तद् दंसनाभि रामासु पक्वं शच्या नि दीधः ।
और्णोर्दुर उस्रियाभ्यो वि दृळ्हो दूर्वाद् गा असृजो अङ्गिरस्वान् ६
पप्राथ क्षां महि दंसो व्युर्वी मुप द्यामृष्वो बृहदिन्द्र स्तभायः ।
अधारयो रोदसी देवपुत्रे प्रत्ने मातरा यह्वी ऋतस्य ७
अध त्वा विश्वे पुर इन्द्र देवा एकं तवसं दधिरे भराय ।
अदेवो यदभ्यौहिष्ट देवान् त्स्वर्षाता वृणत इन्द्रमत्र ८
अध द्यौश्चित् ते अप सा नु वज्राद् द्वितानमद् भियसा स्वस्य मन्योः ।
अहिं यदिन्द्रो अभ्योहसानं नि चिद् विश्वायुः शयथे जघान ९
अध त्वष्टा ते मह उग्र वज्रं सहस्रभृष्टिं ववृतच्छताश्रिम् ।
निकाममरमणसं येन नवन्तमहिं सं पिणगृजीषिन् १०
वर्धान् यं विश्वे मरुतः सजोषाः पचच्छतं महिषाँ इन्द्र तुभ्यम् ।
पूषा विष्णुस्त्रीणि सरांसि धावन् वृत्रहणं मदिरमंशुमस्मै ११
आ क्षोदो महि वृतं नदीनां परिष्ठितमसृज ऊर्मिमपाम् ।
तासामनु प्रवत इन्द्र पन्थां प्रार्दयो नीचीरपसः समुद्रम् १२
एवा ता विश्वा चकृवांसमिन्द्रं महामुग्रमजुर्यं सहोदाम् ।
सुवीरं त्वा स्वायुधं सुवज्र मा ब्रह्म नव्यमवसे ववृत्यात् १३
स नो वाजाय श्रवस इषे च राये धेहि द्युमत इन्द्र विप्रान् ।
भरद्वाजे नृवत इन्द्र सूरीन् दिवि च स्मैधि पार्ये न इन्द्र १४

ग्रया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः १५

(१८) ग्रष्टादशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः

तमु ष्टुहि यो ग्रभिभूत्योजा वन्वन्नवातः पुरुहूत इन्द्रः ।
ग्रषाळ्हमुग्रं सहमानमाभि र्गीर्भिर्वर्ध वृषभं चर्षणीनाम् १
स युध्मः सत्वा खजकृत् समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी ।
बृहद्रेणुश्च्यवनो मानुषीणा मेकः कृष्टीनामभवत् सहावा २
त्वं ह नु त्यददमायो दस्यूँ रेकः कृष्टीरवनोरार्याय ।
ग्रस्ति स्विन्नु वीर्यं१॒ तत् त इन्द्र न स्विदस्ति तदृतुथा वि वोचः ३
सदिद्धि ते तुविजातस्य मन्ये सहः सहिष्ठ तुरतस्तुरस्य ।
उग्रमुग्रस्य तवसस्तवीयो ऽरध्रस्य रध्रतुरो बभूव ४
तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमङ्गिरोभिः ।
हन्नच्युतच्युद् दस्मेषयन्त मृणोः पुरो वि दुरो ग्रस्य विश्वाः ५
स हि धीभिर्हव्यो ग्रस्त्युग्र ईशानकृन्महति वृत्रतूर्ये ।
स तोकसाता तनये स वज्री वितन्तसाय्यो ग्रभवत् समत्सु ६
स मज्मना जनिम मानुषाणा ममर्त्येन नाम्नाति प्र सर्स्रे ।
स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः ७
स यो न मुहे न मिथू जनो भूत् सुमन्तुनामा चुमुरिं धुनिं च ।
वृणक् पिप्रुं शम्बरं शुष्णमिन्द्रः पुरां च्यौत्नाय शयथाय नू चित् ८
उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथमिन्द्र तिष्ठ ।
धिष्व वज्रं हस्त ग्रा दक्षिणत्रा ऽभि प्र मन्द पुरुदत्र मायाः ९
ग्रग्निर्न शुष्कं वनमिन्द्र हेती रक्षो नि धक्ष्यशनिर्न भीमा ।
गम्भीरय ऋष्वया यो रुरोजा ध्वानयद् दुरिता दम्भयच्च १०
ग्रा सहस्रं पथिभिरिन्द्र राया तुविद्युम्न तुविवाजेभिरर्वाक् ।
याहि सूनो सहसो यस्य नू चि ददेव ईशे पुरुहूत योतोः ११
प्र तुविद्युम्नस्य स्थविरस्य घृष्वे र्दिवो ररप्शे महिमा पृथिव्याः ।
नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः १२
प्र तत् ते ग्रद्या करणं कृतं भूत् कुत्सं यदायुमतिथिग्वमस्मै ।

पुरू सहस्रा नि शिंशा अभि क्षा मुत् तूर्वयाणं धृषता निनेथ १३
अनु त्वाहिघ्ने अध देव देवा मदन् विश्वे कवितमं कवीनाम् ।
करो यत्र वरिवो बाधिताय दिवे जनाय तन्वे गृणानः १४
अनु द्यावापृथिवी तत् त ओजो ऽमर्त्या जिहत इन्द्र देवाः ।
कृष्वा कृत्नो अकृतं यत् ते अस्त्यु क्थं नवीयो जनयस्व यज्ञैः १५

(१९) एकोनविंशं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः

महाँ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायो रुः पृथुः सुकृतः कर्तृभिर्भूत् १
इन्द्रमेव धिषणा सातये धाद् बृहन्तमृष्वमजरं युवानम् ।
अषाळ्हेन शवसा शूशुवांसं सद्यश्चिद् यो वावृधे असामि २
पृथू करस्ना बहुला गभस्ती अस्मद्र्यक् सं मिमीहि श्रवांसि ।
यूथेव पश्वः पशुपा दमूना अस्माँ इन्द्राभ्या ववृत्स्वाजौ ३
तं व इन्द्रं चतिनमस्य शाकै रिह नूनं वाजयन्तो हुवेम ।
यथा चित् पूर्वे जरितार आसु रनेद्या अनवद्या अरिष्टाः ४
धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः ।
सं जग्मिरे पथ्या रायो अस्मिन् त्समुद्रे न सिन्धवो यादमानाः ५
शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभूत उग्रम् ।
विश्वा द्युम्ना वृष्ण्या मानुषाणा मस्मभ्यं दा हरिवो मादयध्यै ६
यस्ते मदः पृतनाषाळमृध्र इन्द्र तं न आ भर शूशुवांसम् ।
येन तोकस्य तनयस्य सातौ मंसीमहि जिगीवांसस्त्वोताः ७
आ नो भर वृषणं शुष्ममिन्द्र धनस्पृतं शूशुवांसं सुदक्षम् ।
येन वंसाम पृतनासु शत्रून् तवोतिभिरुत जामीँरजामीन् ८
आ ते शुष्मो वृषभ एतु पश्चा दोत्तरादधरादा पुरस्तात् ।
आ विश्वतो अभि समेत्वर्वा ङिन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ९
नृवत् त इन्द्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः ।
ईक्षे हि वस्व उभयस्य राजन् धा रत्नं महि स्थूरं बृहन्तम् १०
मरुत्वन्तं वृषभं वावृधान मकवारिं दिव्यं शासमिन्द्रम् ।

विश्वासाहमवसे नूतनायो ग्रं सहोदामिह तं हुवेम ११
जनं वज्रिन् महि चिन्मन्यमान मेभ्यो नृभ्यो रन्धया येष्वस्मि ।
अधा हि त्वा पृथिव्यां शूरसातौ हवामहे तनये गोष्वप्सु १२
वयं त एभिः पुरुहूत सख्यैः शत्रोःशत्रोरुत्तर इत् स्याम ।
घ्नन्तो वृत्राण्युभयानि शूर राया मदेम बृहता त्वोताः १३

(२०) विंशं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । (१-६, ८-१३) प्रथमादितृचद्वयस्याष्टम्यादितृचद्वयस्य च त्रिष्टुप्, (७) सप्तम्याश्च विराट् छन्दसी

द्यौर्न य इन्द्राभि भूमार्य स्तस्थौ रयिः शवसा पृत्सु जनान् ।
तं नः सहस्रभरमुर्वरासां दद्धि सूनो सहसो वृत्रतुरम् १
दिवो न तुभ्यमन्विन्द्र सत्रा ऽसुर्यं देवेभिर्धायि विश्वम् ।
अहिं यद् वृत्रमपो वव्रिवांसं हन्नृजीषिन् विष्णुना सचानः २
तूर्वन्नोजीयान् तवसस्तवीयान् कृतब्रह्मेन्द्रो वृद्धमहाः ।
राजाभवन्मधुनः सोम्यस्य विश्वासां यत् पुरां दर्त्नुमावत् ३
शतैरपद्रन् पणय इन्द्रात्र दशोणये कवयेऽर्कसातौ ।
वधैः शुष्णस्याशुषस्य मायाः पित्वो नारिरेचीत् किं चन प्र ४
महो द्रुहो अप विश्वायु धायि वज्रस्य यत् पतने पादि शुष्णः ।
उरु ष सरथं सारथये क रिन्द्रः कुत्साय सूर्यस्य सातौ ५
प्र श्येनो न मदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन् ।
प्रावन्नमीं साप्यं ससन्तं पृणग्राया समिषा सं स्वस्ति ६
वि पिप्रोरहिमायस्य दृळ्हाः पुरो वज्रिञ्छवसा न दर्दः ।
सुदामन् तद् रेक्णो अप्रमृष्य मृजिश्वने दात्रं दाशुषे दाः ७
स वेतसुं दशमायं दशोणिं तूतुजिमिन्द्रः स्वभिष्टिसुम्नः ।
आ तुग्रं शश्वदिभं द्योतनाय मातुर्न सीमुप सृजा इयध्यै ८
स ईं स्पृधो वनते अप्रतीतो बिभ्रद् वज्रं वृत्रहणं गभस्तौ ।
तिष्ठद्धरी अध्यस्तेव गर्ते वचोयुजा वहत इन्द्रमृष्वम् ९
सनेम तेऽवसा नव्य इन्द्र प्र पूरवः स्तवन्त एना यज्ञैः ।
सप्त यत् पुरः शर्म शारदीर्द र्द्धन् दासीः पुरुकुत्साय शिक्षन् १०

त्वं वृध इन्द्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्याय ।
परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं नपातम् ११
त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः ।
प्र यत् समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति १२
तव ह त्यदिन्द्र विश्वमाजौ सस्तो धुनीचुमुरी या ह सिष्वप् ।
दीदयदित् तुभ्यं सोमेभिः सुन्वन् दभीतिरिध्मभृतिः पक्थ्यर्कैः १३

(२१) एकविंशं सूक्तम्

(१-१२) द्वादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । (१-८, १०, १२) प्रथमाद्यष्टर्चां दशमीद्वादश्योश्चेन्द्रः, (९, ११) नवम्येकादश्योश्च विश्वे देवा देवताः ।
त्रिष्टुप् छन्दः

इमा उ त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवन्ते ।
धियो रथेष्ठामजरं नवीयो रयिर्विभूतिरीयते वचस्या १
तमु स्तुष इन्द्रं यो विदानो गिर्वाहसं गीर्भिर्यज्ञवृद्धम् ।
यस्य दिवमति मह्ना पृथिव्याः पुरुमायस्य रिरिचे महित्वम् २
स इत् तमोऽवयुनं ततन्वत् सूर्येण वयुनवच्चकार ।
कदा ते मर्ता अमृतस्य धामेयक्षन्तो न मिनन्ति स्वधावः ३
यस्ता चकार स कुह स्विदिन्द्रः कमा जनं चरति कासु विक्षु ।
कस्ते यज्ञो मनसे शं वराय को अर्क इन्द्र कतमः स होता ४
इदा हि ते वेविषतः पुराजाः प्रत्नास आसुः पुरुकृत् सखायः ।
ये मध्यमास उत नूतनास उतावमस्य पुरुहूत बोधि ५
तं पृच्छन्तोऽवरासः पराणि प्रत्ना त इन्द्र श्रुत्यानु येमुः ।
अर्चामसि वीर ब्रह्मवाहो यादेव विद्म तात् त्वा महान्तम् ६
अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तत्सु तिष्ठ ।
तव प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप ता नुदस्व ७
स तु श्रुधीन्द्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः ।
त्वं ह्यापिः प्रदिवि पितृणां शश्वद् बभूथ सुहव एष्टौ ८
प्रोतये वरुणं मित्रमिन्द्रं मरुतः कृष्वावसे नो अद्य ।
प्र पूषणं विष्णुमग्निं पुरंधिं सवितारमोषधीः पर्वतांश्च ९
इम उ त्वा पुरुशाक प्रयज्यो जरितारो अभ्यर्चन्त्यर्कैः ।

श्रुधी हवमा हुवतो हुवानो न त्वावाँ अन्यो अमृत त्वदस्ति १०
नू म आ वाचमुप याहि विद्वान् विश्वेभिः सूनो सहसो यजत्रैः ।
ये अग्निजिह्वा ऋतसाप आसु र्ये मनु चक्रुरुपरं दसाय ११
स नो बोधि पुरएता सुगेषू त दुर्गेषु पथिकृद् विदानः ।
ये अश्रमास उरवो वहिष्ठा स्तेभिर्न इन्द्राभि वक्षि वाजम् १२

(२२) द्वाविंशं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः

य एक इद्धव्यश्चर्षणीना मिन्द्रं तं गीर्भिरभ्यर्च आभिः ।
यः पत्यते वृषभो वृष्ण्यावान् त्सत्यः सत्वा पुरुमायः सहस्वान् १
तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयन्तः ।
नक्षद्दाभं ततुरिं पर्वतेष्ठा मद्रोघवाचं मतिभिः शविष्ठम् २
तमीमह इन्द्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः ।
यो अस्कृधोयुरजरः स्वर्वान् तमा भर हरिवो मादयध्यै ३
तन्नो वि वोचो यदि ते पुरा चि ज्जरितार आनशुः सुम्नमिन्द्र ।
कस्ते भागः किं वयो दुध्र खिद्वः पुरुहूत पुरूवसोऽसुरघ्नः ४
तं पृच्छन्ती वज्रहस्तं रथेष्ठा मिन्द्रं वेपी वक्वरी यस्य नू गीः ।
तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुम्रमच्छ ५
अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः पर्वतेन ।
अच्युता चिद् वीळिता स्वोजो रुजो वि दृळहा धृषता विरप्शिन् ६
तं वो धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नवत् परितंसयध्यै ।
स नो वक्षदनिमानः सुवह्मे न्द्रो विश्वान्यति दुर्गहाणि ७
आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयोऽन्तरिक्षा ।
तपा वृषन् विश्वतः शोचिषा तान् ब्रह्मद्विषे शोचय क्षामपश्च ८
भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेषसंदृक् ।
धिष्व वज्रं दक्षिण इन्द्र हस्ते विश्वा अजुर्य दयसे वि मायाः ९
आ संयतमिन्द्र णः स्वस्तिं शत्रुतूर्याय बृहतीममृध्राम् ।
यया दासान्यार्याणि वृत्रा करो वज्रिन् सुतुका नाहुषाणि १०
स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिरा गहि प्रयज्यो ।

न या अदे॑वो॒ वर॑ते॒ न दे॒व आभि॑र्याहि॒ तूय॒मा म॑द्र्य॒द्रिक् ११

(२३) त्रयोविंशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः

सु॒त इत् त्वं निमि॑श्ल इन्द्र॒ सोमे॒ स्तोमे॒ ब्रह्म॑णि॒ शस्यमा॑न उ॒क्थे ।
यद् वा॑ यु॒क्ताभ्यां॑ मघव॒न् हरि॑भ्या॒ं बिभ्र॒द् वज्रं॑ बा॒ह्वोरि॑न्द्र॒ यासि॑ १
यद् वा॑ दि॒वि पार्ये॒ सुष्वि॑मिन्द्र वृ॒त्रहत्येऽव॑सि॒ शूर॑सातौ ।
यद॒ वा॒ दक्ष॑स्य बि॒भ्युषो॒ अबि॑भ्य॒ दर॑न्धय॒ः शर्ध॑त इन्द्र॒ दस्यू॑न् २
पाता॑ सु॒तमिन्द्रो॑ अस्तु॒ सोमं॑ प्रणे॒नीरु॒ग्रो ज॑रि॒तार॑मू॒ती ।
कर्ता॑ वी॒राय॒ सुष्व॑य उ लो॒कं दाता॒ वसु॑ स्तुव॒ते की॒रये॑ चित् ३
गन्तेया॑न्ति॒ सव॑ना॒ हरि॑भ्यां ब॒भ्रिर्वज्रं॑ प॒पिः सोमं॑ द॒दिर्गाः ।
कर्ता॑ वी॒रं नर्यं॑ सर्व॑वीरं॒ श्रोता॒ हवं॑ गृ॒णतः स्तोम॑वाहाः ४
अस्मै॑ व॒यं यद् वा॒वान॒ तद् वि॑विष्म॒ इन्द्रा॑य॒ यो नः॑ प्र॒दिवो॒ अप॒स्कः ।
सु॒ते सोमे॑ स्तुमसि॒ शंस॑दु॒क्थे न्द्रा॑य॒ ब्रह्म॒ वर्ध॑नं॒ यथास॑त् ५
ब्रह्मा॑णि॒ हि च॑कृ॒षे वर्ध॑नानि॒ ताव॑त् त इन्द्र म॒तिभि॑र्विविष्मः ।
सु॒ते सोमे॑ सुतपाः॒ शंत॑मानि॒ रान्द्र्या॑ क्रियास्म॒ वक्ष॑णानि य॒ज्ञैः ६
स नो॑ बोधि पु॒रोळा॒शं ररा॑णः॒ पिबा॒ तु सोमं॒ गोऋ॑जीकमिन्द्र ।
एदं ब॒र्हिर्यज॑मानस्य सीदो॒ रुं कृ॑धि त्वाय॒त उ॑ लो॒कम् ७
स म॑न्दस्वा॒ ह्यनु॒ जोष॑मुग्र॒ प्र त्वा॑ य॒ज्ञास॑ इ॒मे अ॑श्नुवन्तु ।
प्रेमे हवा॑सः पुरुहू॒तम॒स्मे आ त्वे॒यं धीरव॑स इन्द्र यम्याः ८
तं वः॑ सखाय॒ः सं यथा॑ सु॒तेषु॒ सोमे॑भिरीं पृणता भो॒जमिन्द्र॑म् ।
कु॒वित् तस्मा॒ अस॑ति नो॒ भरा॑य॒ न सुष्वि॒मिन्द्रोऽव॑से मृधाति ९
ए॒वेदिन्द्रः॑ सु॒ते अ॑स्तावि॒ सोमे॑ भ॒रद्वा॑जेषु॒ क्षय॒दिन्म॒घोनः॑ ।
अस॒द् यथा॑ जरि॒त्र उ॒त सू॒रि रिन्द्रो॑ रा॒यो वि॒श्ववा॑रस्य दा॒ता १०

तृतीयोऽनुवाकः
सू० २४ ।४३

(२४) चतुर्विंशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः

वृषा मद इन्द्रे श्लोक उक्था सचा सोमेषु सुतपा ऋजीषी ।
अर्चत्र्यो मघवा नृभ्य उक्थै द्युक्षो राजा गिरामक्षितोतिः १
ततुरिर्वीरो नर्यो विचेताः श्रोता हवं गृणत उर्व्यूतिः ।
वसुः शंसो नरां कारुधाया वाजी स्तुतो विदथे दाति वाजम् २
अक्षो न चक्र्योः शूर बृहन् प्र ते मह्ना रिरिचे रोदस्योः ।
वृक्षस्य नु ते पुरुहूत वया व्यूतयो रुरुहुरिन्द्र पूर्वीः ३
शचीवतस्ते पुरुशाक शाका गवामिव स्रुतयः संचरणीः ।
वत्सानां न तन्तयस्त इन्द्र दामन्वन्तो अदामानः सुदामन् ४
अन्यदद्य कर्वरमन्यदु श्वो ऽसच्च सन्मुहुराचक्रिरिन्द्रः ।
मित्रो नो अत्र वरुणश्च पूषा ऽर्यो वशस्य पर्येतास्ति ५
वि त्वदापो न पर्वतस्य पृष्ठा दुक्थेभिरिन्द्रानयन्त यज्ञैः ।
तं त्वाभिः सुष्टुतिभिर्वाजयन्त आजिं न जग्मुर्गिर्वाहो अश्वाः ६
न यं जरन्ति शरदो न मासा न द्याव इन्द्रमवकर्शयन्ति ।
वृद्धस्य चिद् वर्धतामस्य तनूः स्तोमेभिरुक्थैश्च शस्यमाना ७
न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान् ।
अज्रा इन्द्रस्य गिरयश्चिदृष्वा गम्भीरे चिद् भवति गाधमस्मै ८
गम्भीरेण न उरुणामत्रिन् प्रेषो यन्धि सुतपावन् वाजान् ।
स्था ऊ षु ऊर्ध्व ऊती अरिषण्य न्नक्तोर्व्युष्टौ परितक्म्यायाम् ९
सचस्व नायमवसे अभीक इतो वा तमिन्द्र पाहि रिषः ।
अमा चैनमरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः १०

## (२५) पञ्चविंशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः

या त ऊतिरवमा या परमा या मध्यमेन्द्र शुष्मिन्नस्ति ।
ताभिरू षु वृत्रहत्येऽवीर्न एभिश्च वाजैर्महान् न उग्र १
आभिः स्पृधो मिथतीररिषण्य न्नमित्रस्य व्यथया मन्युमिन्द्र ।
आभिर्विश्वा अभियुजो विषूची रार्याय विशोऽव तारीर्दासीः २

इन्द्रं जामयं उत ये ऽजामयो ऽर्वाचीनासो वनुषो युयुज्रे ।
त्वमेषां विथुरा शवांसि जहि वृष्ण्यानि कृणुही पराचः ३
शूरो वा शूरं वनते शरीरै स्तनूरुचा तरुषि यत् कृण्वैते ।
तोके वा गोषु तनये यदप्सु वि क्रन्दसी उर्वरासु ब्रवैते ४
नहि त्वा शूरो न तुरो न धृष्णु र्न त्वा योधो मन्यमानो युयोधं ।
इन्द्र नकिष्ट्वा प्रत्यस्त्येषां विश्वा जातान्यभ्यसि तानि ५
स पत्यत उभयोर्नृम्णमयो र्यदी वेधसः समिथे हवन्ते ।
वृत्रे वा महो नृवति क्षयै वा व्यचस्वन्ता यदि वितन्तसैते ६
अध स्मा ते चर्षणयो यदेजा निन्द्र त्रातोत भवा वरूता ।
अस्माकासो ये नृतमासो अर्य इन्द्र सूरयो दधिरे पुरो नः ७
अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।
अनु क्षत्रमनु सहो यजत्रे न्द्र देवेभिरनु ते नृषह्ये ८
एवा नः स्पृधः समजा समत्स्विन्द्र रारन्धि मिथतीरदेवीः ।
विद्याम वस्तोरवसा गृणन्तो भरद्वाजा उत त इन्द्र नूनम् ९

(२६) षड्विंशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः

श्रुधी न इन्द्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः ।
सं यद् विशोऽयन्त शूरसाता उग्रं नो ऽवः पार्ये अहन् दाः १
त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ ।
त्वां वृत्रेष्विन्द्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन् २
त्वं कविं चोदयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क् ।
त्वं शिरो अमर्मणः पराह न्नतिथिग्वाय शंस्यं करिष्यन् ३
त्वं रथं प्र भरो योधमृष्व मावो युध्यन्तं वृषभं दशद्युम् ।
त्वं तुग्रं वेतसवे सचाहन् त्वं तुजिं गृणन्तमिन्द्र तूतोः ४
त्वं तदुक्थमिन्द्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि ।
अव गिरेर्दासं शम्बरं हन् प्रावो दिवोदासं चित्राभिरूती ५
त्वं श्रद्धाभिर्मन्दसानः सोमै र्दभीतये चुमुरिमिन्द्र सिष्वप् ।
त्वं रजिं पिठीनसे दशस्यन् षष्टिं सहस्रा शच्या सचाहन् ६

अहं चन तत् सूरिभिरानश्यां तव ज्याय इन्द्र सुम्नमोजः ।
त्वया यत् स्तवन्ते सधवीर वीरा स्त्रिवरूथेन नहुषा शविष्ठ ७
वयं ते अस्यामिन्द्र द्युम्नहूतौ सखायः स्याम महिन प्रेष्ठाः ।
प्रातर्दनिः क्षत्रश्रीरस्तु श्रेष्ठो घने वृत्राणां सनये धनानाम् ८

(२७) सप्तविंशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । (१-७) प्रथमादिसप्तर्चामिन्द्रः, (८) अष्टम्याश्च चायमानस्याभ्यावर्तिनो दानं देवते । त्रिष्टुप् छन्दः

किमस्य मदे किम्वस्य पीता विन्द्रः किमस्य सख्ये चकार ।
रणा वा ये निषदि किं ते अस्य पुरा विविद्रे किमु नूतनासः १
सदस्य मदे सद्वस्य पीता विन्द्रः सदस्य सख्ये चकार ।
रणा वा ये निषदि सत् ते अस्य पुरा विविद्रे सदु नूतनासः २
नहि नु ते महिमनः समस्य न मघवन् मघवत्त्वस्य विद्म ।
न राधसोराधसो नूतनस्ये न्द्र नकिर्ददृश इन्द्रियं ते ३
एतत् त्यत् त इन्द्रियमचेति येनावधीर्वरशिखस्य शेषः ।
वज्रस्य यत् ते निहतस्य शुष्मात् स्वनाच्चिदिन्द्र परमो ददार ४
वधीदिन्द्रो वरशिखस्य शेषो ऽभ्यावर्तिने चायमानाय शिक्षन् ।
वृचीवतो यद्धरियूपीयायां हन् पूर्वे अर्धे भियसापरो दर्त् ५
त्रिंशच्छतं वर्मिण इन्द्र साकं यव्यावत्यां पुरुहूत श्रवस्या ।
वृचीवन्तः शरवे पत्यमानाः पात्रा भिन्दाना न्यर्थान्यायन् ६
यस्य गावावरुषा सूयवस्यू अन्तरू षु चरतो रेरिहाणा ।
स सृञ्जयाय तुर्वशं परादाद् वृचीवतो दैववाताय शिक्षन् ७
द्वयाँ अग्ने रथिनो विंशतिं गा वधूमतो मघवा मह्यं सम्राट् ।
अभ्यावर्ती चायमानो ददाति दूणाशेयं दक्षिणा पार्थवानाम् ८

(२८) अष्टाविंशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । (१, ३-७) प्रथमर्चस्तृतीयादिपञ्चानाञ्च गावः, (२, ८) द्वितीयाष्टम्योरिन्द्रो गावो वा देवताः । (१, ५-७) प्रथमर्चः पञ्चम्यादितृचस्य च त्रिष्टुप्, (२-४) द्वितीयादितृचस्य

जगती, (८) अष्टम्याश्चानुष्टुप् छन्दांसि

आ गावो अग्मन्नुत भद्रमक्रन् त्सीदन्तु गोष्ठे रणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्यु रिन्द्राय पूर्वीरुषसो दुहानाः १
इन्द्रो यज्वने पृणते च शिक्ष त्युपेद् ददाति न स्वं मुषायति ।
भूयोभूयो रयिमिदस्य वर्धय न्नभिन्ने खिल्ये नि दधाति देवयुम् २
न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवाँश्च याभिर्यजते ददाति च ज्योगित् ताभिः सचते गोपतिः सह ३
न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यन्ति ता अभि ।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ४
गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः ।
इमा या गावः स जनास इन्द्र इच्छामीद्धदा मनसा चिदिन्द्रम् ५
यूयं गावो मेदयथा कृशं चि दश्रीरं चित् कृणुथा सुप्रतीकम् ।
भद्रं गृहं कृणुथ भद्रवाचो बृहद् वो वय उच्यते सभासु ६
प्रजावतीः सूयवसं रिशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः ।
मा व स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः ७
उपेदमुपपर्चन मासु गोषूप पृच्यताम् ।
उप ऋषभस्य रेत स्युपेन्द्र तव वीर्ये ८

सप्तमोऽध्यायः

व० १-३५

(२९) एकोनत्रिंशं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।

त्रिष्टुप् छन्दः

इन्द्रं वो नरः सख्याय सेपु र्महो यन्तः सुमतये चकानाः ।
महो हि दाता वज्रहस्तो अस्ति महामु रण्वमवसे यजध्वम् १
आ यस्मिन् हस्ते नर्या मिमिक्षु रा रथे हिरण्यये रथेष्ठाः ।
आ रश्मयो गभस्त्योः स्थूरयो राध्वन्नश्वासो वृषणो युजानाः २
श्रिये ते पादा दुव आ मिमिक्षु र्धृष्णुर्वज्री शवसा दक्षिणावान् ।
वसानो अत्कं सुरभिं दृशे कं स्वर्ण नृतविषिरो बभूथ ३
स सोम आमिश्लतमः सुतो भूद् यस्मिन् पक्तिः पच्यते सन्ति धानाः ।

इन्द्रं नरः स्तुवन्तो ब्रह्मकारा उक्था शंसन्तो देववाततमाः ४
न ते अन्तः शवसो धाय्यस्य वि तु बाबधे रोदसी महित्वा ।
आ ता सूरिः पृणति तूतुजानो यूथेवाप्सु समीजमान ऊती ५
एवेदिन्द्रः सुहव ऋष्वो अस्तू ती अनूती हिरिशिप्रः सत्वा ।
एवा हि जातो असमात्योजाः पुरू च वृत्रा हनति नि दस्यून् ६

(३०) त्रिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः

भूय इद् वावृधे वीर्याय एको अजुर्यो दयते वसूनि ।
प्र रिरिचे दिव इन्द्रः पृथिव्या अर्धमिदस्य प्रति रोदसी उभे १
अधा मन्ये बृहदसुर्यमस्य यानि दाधार नकिरा मिनाति ।
दिवेदिवे सूर्यो दर्शतो भूद् वि सद्मान्युर्विया सुक्रतुर्धात् २
अद्या चिन्नू चित् तदपो नदीनां यदाभ्यो अरदो गातुमिन्द्र ।
नि पर्वता अद्मसदो न सेदु स्त्वया दृळ्हानि सुक्रतो रजांसि ३
सत्यमित् तन्न त्वावाँ अन्यो अस्ती न्द्र देवो न मर्त्यो ज्यायान् ।
अहन्नहिं परिशयानमर्णो ऽवासृजो अपो अच्छा समुद्रम् ४
त्वमपो वि दुरो विषूची रिन्द्र दृळ्हमरुजः पर्वतस्य ।
राजाभवो जगतश्चर्षणीनां साकं सूर्यं जनयन् द्यामुषासम् ५

(३१) एकत्रिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य भारद्वाजः सुहोत्र ऋषिः । इन्द्रो देवता । (१-३, ५) प्रथमादितृचस्य पञ्चम्या ऋचश्च त्रिष्टुप्, (४) चतुर्थ्याश्च शक्वरी छन्दसी

अभूरेको रयिपते रयीणा मा हस्तयोरधिथा इन्द्र कृष्टीः ।
वि तोके अप्सु तनये च सूरे ऽवोचन्त चर्षणयो विवाचः १
त्वद् भियेन्द्र पार्थिवानि विश्वा ऽच्युता चिच्च्यावयन्ते रजांसि ।
द्यावाक्षामा पर्वतासो वनानि विश्वं दृळ्हं भयते अज्मन्ना ते २
त्वं कुत्सेनाभि शुष्णमिन्द्रा ऽशुषं युध्य कुयवं गविष्टौ ।
दश प्रपित्वे अध सूर्यस्य मुषायश्चक्रमविवे रपांसि ३
त्वं शतान्यव शम्बरस्य पुरो जघन्थाप्रतीनि दस्योः ।

अशिक्षो यत्र शच्या शचीवो दिवोदासाय सुन्वते सुतक्रे भरद्वाजाय गृणते वसूनि ४
स सत्यसत्वन् महते रणाय रथमा तिष्ठ तुविनृम्ण भीमम् ।
याहि प्रपथिन्नवसोप मद्रिक् प्र च श्रुत श्रावय चर्षणिभ्यः ५

(३२) द्वात्रिंशं सूक्तम्
(१-५) पञ्चर्चस्यास्य सूक्तस्य भारद्वाजः सुहोत्र ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः

अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शंतमानि वचांस्यासा स्थविराय तक्षम् १
स मातरा सूर्येणा कवीना मवासयद् रुजदद्रिं गृणानः ।
स्वाधीभिर्ऋक्वभिर्वावशान उदुस्रियाणामसृजन्निदानम् २
स वह्निभिर्ऋक्वभिर्गोषु शश्वन् मितज्ञुभिः पुरुकृत्वा जिगाय ।
पुरः पुरोहा सखिभिः सखीयन् दृळहा रुरोज कविभिः कविः सन् ३
स नीव्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च शुष्मैः ।
पुरुवीराभिर्वृषभ क्षितीना मा गिर्वणः सुविताय प्र याहि ४
स सर्गेण शवसा तक्तो अत्यै रप इन्द्रो दक्षिणतस्तुराषाट् ।
इत्था सृजाना अनपावृदर्थं दिवेदिवे विविषुरप्रमृष्यम् ५

(३३) त्रयस्त्रिंशं सूक्तम्
(१-५) पञ्चर्चस्यास्य सूक्तस्य भारद्वाजः शुनहोत्र ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः

य ओजिष्ठ इन्द्र तं सु नो दा मदो वृषन् त्स्वभिष्टिर्दास्वान् ।
सौवश्व्यं यो वनवत् स्वश्वो वृत्रा समत्सु सासहदमित्रान् १
त्वां हीइन्द्रावसे विवाचो हवन्ते चर्षणयः शूरसातौ ।
त्वं विप्रेभिर्वि पणीँरशाय स्त्वोत इत् सनिता वाजमर्वा २
त्वं ताँ इन्द्रोभयाँ अमित्रान् दासा वृत्राण्यार्या च शूर ।
वधीर्वनेव सुधितेभिरत्कै रा पृत्सु दर्षि नृणां नृतम ३
स त्वं न इन्द्राकवाभिरूती सखा विश्वायुरविता वृधे भूः ।
स्वर्षाता यद्ध्वयामसि त्वा युध्यन्तो नेमधिता पृत्सु शूर ४

नूनं न इन्द्रापरायं च स्या भवा मृळीक उत नो अभिष्टौ ।
इत्था गृणन्तो महिनस्य शर्मन् दिवि ष्याम पार्ये गोषतमाः ५

(३४) चतुस्त्रिंशं सूक्तम्
(१-५) पञ्चर्चस्यास्य सूक्तस्य भारद्वाजः शुनहोत्र ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः
सं च त्वे जग्मुर्गिर इन्द्र पूर्वी र्वि च त्वद् यन्ति विभ्वो मनीषाः ।
पुरा नूनं च स्तुतय ऋषीणां पस्पृध्र इन्द्रे अध्युक्थार्का १
पुरुहूतो यः पुरुगूर्त ऋभ्वाँ एकः पुरुप्रशस्तो अस्ति यज्ञैः ।
रथो न महे शवसे युजानो३ ऽस्माभिरिन्द्रो अनुमाद्यो भूत् २
न यं हिंसन्ति धीतयो न वाणी रिन्द्रं नक्षन्तीदभि वर्धयन्तीः ।
यदि स्तोतारः शतं यत् सहस्रं गृणन्ति गिर्वणसं शं तदस्मै ३
अस्मा एतद् दिव्य१र्चेव मासा मिमिक्ष इन्द्रे न्ययामि सोमः ।
जनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हवनानि यज्ञैः ४
अस्मा एतन्मह्याङ्गूषमस्मा इन्द्राय स्तोत्रं मतिभिरवाचि ।
असद् यथा महति वृत्रतूर्य इन्द्रो विश्वायुरविता वृधश्च ५

(३५) पञ्चत्रिंशं सूक्तम्
(१-५) पञ्चर्चस्यास्य सूक्तस्य भारद्वाजो नर ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः
कदा भुवन् रथक्षयाणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः ।
कदा स्तोमं वासयोऽस्य राया कदा धियः करसि वाजरत्नाः १
कर्हि स्वित् तदिन्द्र यन्नृभिर्नॄन् वीरैर्वीरान् नीळयासे जयाजीन् ।
त्रिधातु गा अधि जयासि गोष्वि न्द्र द्युम्नं स्वर्वद् धेह्यस्मे २
कर्हि स्वित् तदिन्द्र यज्जरित्रे विश्वप्सु ब्रह्म कृणवः शविष्ठ ।
कदा धियो न नियुतो युवासे कदा गोमघा हवनानि गच्छाः ३
स गोमघा जरित्रे अश्वश्चन्द्रा वाजश्रवसो अधि धेहि पृक्षः ।
पीपिहीषः सुदुघामिन्द्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः ४
तमा नूनं वृजनमन्यथा चि च्छूरो यच्छक्र वि दुरो गृणीषे ।
मा निररं शुक्रदुघस्य धेनो राङ्गिरसान् ब्रह्मणा विप्र जिन्व ५

(३६) षट्त्रिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य भारद्वाजो नर ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः

सत्रा मदासस्तव विश्वजन्याः सत्रा रायोऽध ये पार्थिवासः ।
सत्रा वाजानामभवो विभक्ता यद् देवेषु धारयथा असुर्यम् १
अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय ।
स्यूमगृभे दुधयेऽर्वते च क्रतुं वृञ्जन्त्यपि वृत्रहत्ये २
तं सध्रीचीरूतयो वृष्ण्यानि पौंस्यानि नियुतः सश्चुरिन्द्रम् ।
समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आ विशन्ति ३
स रायस्खामुप सृजा गृणानः पुरुश्चन्द्रस्य त्वमिन्द्र वस्वः ।
पतिर्बभूथासमो जनाना मेको विश्वस्य भुवनस्य राजा ४
स तु श्रुधि श्रुत्या यो दुवोयु र्द्यौर्न भूमाभि रायो अर्यः ।
असो यथा नः शवसा चकानो युगेयुगे वयसा चेकितानः ५

(३७) सप्तत्रिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः

अर्वाग्रथं विश्ववारं त उग्रे न्द्रं युक्तासो हरयो वहन्तु ।
कीरिश्चिद्धि त्वा हवते स्वर्वानृ धीमहि सधमादस्ते अद्य १
प्रो द्रोणे हरयः कर्माग्मन् पुनानास ऋज्यन्तो अभूवन् ।
इन्द्रो नो अस्य पूर्व्यः पपीयाद् द्युक्षो मदस्य सोम्यस्य राजा २
आसस्राणासः शवसानमच्छे न्द्रं सुचक्रे रथ्यासो अश्वाः ।
अभि श्रव ऋज्यन्तो वहेयु र्नू चिन्नु वायोरमृतं वि दस्येत् ३
वरिष्ठो अस्य दक्षिणामियर्ती न्द्रो मघोना तुविकूर्मितमः ।
यया वज्रिवः परियास्यंहो मघा च धृष्णो दयसे वि सूरीन् ४
इन्द्रो वाजस्य स्थविरस्य दाते न्द्रो गीर्भिर्वर्धतां वृद्धमहाः ।
इन्द्रो वृत्रं हनिष्ठो अस्तु सत्वाऽऽ ता सूरिः पृणति तूतुजानः ५

(३८) अष्टात्रिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः

अपादित उदु नश्चित्रतमो मही भर्षद् द्युमतीमिन्द्रहूतिम् ।
पन्यसीं धीतिं दैव्यस्य यामञ्जनस्य रातिं वनते सुदानुः १
दूराच्चिदा वसतो अस्य कर्णा घोषादिन्द्रस्य तन्यति ब्रुवाणः ।
एयमेनं देवहूतिर्ववृत्यान्मद्र्यगिन्द्रमियमृच्यमाना २
तं वो धिया परमया पुराजामजरमिन्द्रमभ्यनूष्यर्कैः ।
ब्रह्मा च गिरो दधिरे समस्मिन् महांश्च स्तोमो अधि वर्धदिन्द्रे ३
वर्धाद् यं यज्ञ उत सोम इन्द्रं वर्धाद् ब्रह्म गिर उक्था च मन्म ।
वर्धाहैनमुषसो यामन्नक्तोर्वर्धान् मासाः शरदो द्याव इन्द्रम् ४
एवा जज्ञानं सहसे असामि वावृधानं राधसे च श्रुताय ।
महामुग्रमवसे विप्र नूनमा विवासेम वृत्रतूर्येषु ५

(३९) एकोनचत्वारिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः

मन्द्रस्य कवेर्दिव्यस्य वह्नेर्विप्रमन्मनो वचनस्य मध्वः ।
अपा नस्तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः १
अयमुशानः पर्यद्रिमुस्रा ऋतधीतिभिरृतयुग्युजानः ।
रुजदरुग्णं वि वलस्य सानुं पणींर्वचोभिरभि योधदिन्द्रः २
अयं द्योतयदद्युतो व्यक्तून् दोषा वस्तोः शरद इन्दुरिन्द्र ।
इमं केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार ३
अयं रोचयदरुचो रुचानोऽयं वासयद् व्यृतेन पूर्वीः ।
अयमीयत ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः ४
नू गृणानो गृणते प्रत्न राजन्निषः पिन्व वसुदेयाय पूर्वीः ।
अप ओषधीरविषा वनानि गा अर्वतो नॄनृचसे रिरीहि ५

(४०) चत्वारिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः

इन्द्र पिब तुभ्यं सुतो मदायाव स्य हरी वि मुचा सखाया ।

उत प्र गाय गण आ निषद्याऽथा यज्ञाय गृणते वयो धाः १
अस्य पिब यस्य जज्ञान इन्द्र मदाय क्रत्वे अपिबो विरप्शिन् ।
तमु ते गावो नर आपो अद्रिरिन्दुं समह्यन् पीतये समस्मै २
समिद्धे अग्नौ सुत इन्द्र सोम आ त्वा वहन्तु हरयो वहिष्ठाः ।
त्वायता मनसा जोहवीमीन्द्रा याहि सुविताय महे नः ३
आ याहि शश्वदुशता ययाथेन्द्र महा मनसा सोमपेयम् ।
उप ब्रह्माणि शृणव इमा नोऽथा ते यज्ञस्तन्वे३ वयो धात् ४
यदिन्द्र दिवि पार्ये यदृधग्यद् वा स्वे सदने यत्र वासि ।
अतो नो यज्ञमवसे नियुत्वान् त्सजोषाः पाहि गिर्वणो मरुद्भिः ५

(४१) एकचत्वारिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।
त्रिष्टुप् छन्दः

अहेळमान उप याहि यज्ञं तुभ्यं पवन्त इन्दवः सुतासः ।
गावो न वज्रिन् त्स्वमोको अच्छेन्द्रा गहि प्रथमो यज्ञियानाम् १
या ते काकुत् सुकृता या वरिष्ठा यया शश्वत् पिबसि मध्व ऊर्मिम् ।
तया पाहि प्र ते अध्वर्युरस्थात् सं ते वज्रो वर्ततामिन्द्र गव्युः २
एष द्रप्सो वृषभो विश्वरूप इन्द्राय वृष्णे समकारि सोमः ।
एतं पिब हरिवः स्थातरुग्र यस्येशिषे प्रदिवि यस्ते अन्नम् ३
सुतः सोमो असुतादिन्द्र वस्यानयं श्रेयाञ्चिकितुषे रणाय ।
एतं तितिर्व उप याहि यज्ञं तेन विश्वास्तविषीरा पृणस्व ४
ह्वयामसि त्वेन्द्र याह्यर्वाङरं ते सोमस्तन्वे भवाति ।
शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु ५

(४२) द्विचत्वारिंशं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । (१-३) प्रथमादितृचस्यानुष्टुप्, (४) चतुर्थ्या ऋचश्च बृहती छन्दसी

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
अरंगमाय जग्मयेऽपश्चाद्दघ्वने नरे १
एमेनं प्रत्येतन सोमेभिः सोमपातमम् ।

अमंत्रेभिर्ऋजीषिण मिन्द्रं सुतेभिरिन्दुभिः २
यदीं सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ ।
वेदा विश्वस्य मेधिरो धृषत् तंतमिदेषते ३
अस्माअस्मा इदन्धसो ऽध्वर्यो प्र भरा सुतम् ।
कुवित् समस्य जेन्यस्य शर्धतो ऽभिशस्तेरवस्परत् ४

(४३) त्रिचत्वारिंशं सूक्तम्
(१-४) चतुर्ऋचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता ।
उष्णिक् छन्दः

यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयः ।
अयं स सोम इन्द्र ते सुतः पिब १
यस्य तीव्रसुतं मदं मध्यमन्तं च रक्षसे ।
अयं स सोम इन्द्र ते सुतः पिब २
यस्य गा अन्तरश्मनो मदे दृळहा अवासृजः ।
अयं स सोम इन्द्र ते सुतः पिब ३
यस्य मन्दानो अन्धसो माघोनं दधिषे शवः ।
अयं स सोम इन्द्र ते सुतः पिब ४
चतुर्थोऽनुवाकः
सू० ४४ ।४६

(४४) चतुश्चत्वारिंशं सूक्तम्
(१-२४) चतुर्विंशत्यृचस्यास्य सूक्तस्य बार्हस्पत्यः शंयुर्ऋषिः । इन्द्रो देवता ।
(१-६) प्रथमादितृचद्वयस्यानुष्टुप्, (७, ९-२४) सप्तम्या नवम्यादिषोडशर्चाञ्च त्रिष्टुप्, (८) अष्टम्याश्च विराट् छन्दांसि

यो रयिवो रयिंतमो यो द्युम्नैर्द्युम्नवत्तमः ।
सोमः सुतः स इन्द्र ते ऽस्ति स्वधापते मदः १
यः शग्मस्तुविशग्म ते रायो दामा मतीनाम् ।
सोमः सुतः स इन्द्र ते ऽस्ति स्वधापते मदः २
येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः ।
सोमः सुतः स इन्द्र ते ऽस्ति स्वधापते मदः ३

त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् ।
इन्द्रं विश्वासाहं नरं मंहिष्ठं विश्वचर्षणिम् ४
यं वर्धयन्तीद् गिरः पतिं तुरस्य राधसः ।
तमिन्वस्य रोदसी देवी शुष्मं सपर्यतः ५
तद् व उक्थस्य बर्हणे न्द्रायोपस्तृणीषणि ।
विपो न यस्योतयो वि यद् रोहन्ति सक्षितः ६
अविदद् दक्षं मित्रो नवीयान् पपानो देवेभ्यो वस्यो अचैत् ।
ससवान् त्स्तौलाभिर्धौतरीभि रुरुष्या पायुरभवत् सखिभ्यः ७
ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन् ।
दधानो नाम महो वचोभि र्वपुर्दृशये वेन्यो व्यावः ८
द्युमत्तमं दक्षं धेह्यस्मे सेधा जनानां पूर्वीररातीः ।
वर्षीयो वयः कृणुहि शचीभिर्धनस्य सातावस्माँ अविड्ढि ९
इन्द्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः ।
नकिरापिर्ददृशे मर्त्यत्रा किमङ्ग रध्रचोदनं त्वाहुः १०
मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम ।
पूर्वीष्ट इन्द्र निष्षिधो जनेषु जह्यसुष्वीन् प्र वृहापृणतः ११
उदभ्राणीव स्तनयन्नियर्ती न्द्रो राधांस्यश्व्यानि गव्या ।
त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दभन् मघोनः १२
अध्वर्यो वीर प्र महे सुताना मिन्द्राय भर स ह्यस्य राजा ।
यः पूर्व्याभिरुत नूतना भिर्गीर्भिर्वावृधे गृणतामृषीणाम् १३
अस्य मदे पुरु वर्पांसि विद्वा निन्द्रो वृत्राण्यप्रती जघान ।
तमु प्र होषि मधुमन्तमस्मै सोमं वीराय शिप्रिणे पिबध्यै १४
पाता सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रं वज्रेण मन्दसानः ।
गन्ता यज्ञं परावतश्चिदच्छा वसुर्धीनामविता कारुधायाः १५
इदं त्यत् पात्रमिन्द्रपान मिन्द्रस्य प्रियममृतमपायि ।
मत्सद् यथा सौमनसाय देवं व्यस्मद् द्वेषो युयवद् व्यंहः १६
एना मन्दानो जहि शूर शत्रू ञ्जामिमजामिं मघवन्नमित्रान् ।
अभिषेणाँ अभ्यादेदिशानान् पराच इन्द्र प्र मृणा जही च १७
आसु ष्मा णो मघवन्निन्द्र पृ त्स्वस्मभ्यं महि वरिवः सुगं कः ।
अपां तोकस्य तनयस्य जेष इन्द्र सूरीन् कृणुहि स्मा नो अर्धम् १८

आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः ।
अस्मत्राञ्चो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहन्तु १९
आ ते वृषन् वृषणो द्रोणमस्थु र्घृतप्रुषो नोर्मयो मदन्तः ।
इन्द्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरन्ति वृषभाय सोमम् २०
वृषासि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभः स्तियानाम् ।
वृष्णे त इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय २१
अयं देवः सहसा जायमान इन्द्रेण युजा पणिमस्तभायत् ।
अयं स्वस्य पितुरायुधानी न्दुरमुष्णादशिवस्य मायाः २२
अयमकृणोदुषसः सुपत्नी रयं सूर्ये अदधाज्ज्योतिरन्तः ।
अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्ददमृतं निगूळहम् २३
अयं द्यावापृथिवी वि ष्कभाय दयं रथमयुनक् सप्तरश्मिम् ।
अयं गोषु शच्या पक्वमन्तः सोमो दाधार दशयन्त्रमुत्सम् २४

(४५) पञ्चचत्वारिंशं सूक्तम्

(१-३३) त्रयस्त्रिंशदृचस्यास्य सूक्तस्य बार्हस्पत्यः शंयुर्ऋषिः । (१-३०) प्रथमादित्रिंशदृचामिन्द्रः, (३१-३३) एकत्रिंश्यादितृचस्य च बृबुस्तक्षादेवते । (१-२८, ३०-३२) प्रथमाद्यष्टाविंशत्यृचां त्रिंश्यादितृचस्य च गायत्री, (२९) एकोनत्रिंश्या अतिनिचृत्, (३३) त्रयस्त्रिंश्याश्चानुष्टुप् छन्दांसि

य आनयत् परावतः सुनीती तुर्वशं यदुम् । इन्द्रः स नो युवा सखा १
अविप्रे चिद् वयो दध दनाशुना चिदर्वता । इन्द्रो जेता हितं धनम् २
महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः । नास्य क्षीयन्त ऊतयः ३
सखायो ब्रह्मवाहसे ऽर्चत प्र च गायत । स हि नः प्रमतिर्मही ४
त्वमेकस्य वृत्रह न्नविता द्वयोरसि । उतेदृशे यथा वयम् ५
नयसीद्वति द्विषः कृणोष्युक्थशंसिनः । नृभिः सुवीर उच्यसे ६
ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृग्मियम् । गां न दोहसे हुवे ७
यस्य विश्वानि हस्तयो रूचुर्वसूनि नि द्विता । वीरस्य पृतनाषहः ८
वि दृळहानि चिदद्रिवो जनानां शचीपते । वृह माया अनानत ९
तमु त्वा सत्य सोमपा इन्द्र वाजानां पते । अहूमहि श्रवस्यवः १०
तमु त्वा यः पुरासिथ यो वा नूनं हिते धने । हव्यः स श्रुधी हवम् ११
धीभिरर्वद्भिरर्वतो वाजाँ इन्द्र श्रवाय्यान् । त्वया जेष्म हितं धनम् १२

अभूरु वीर गिर्वणो महाँ इन्द्र धने हिते । भरे वितन्तसाय्यः १३
या त ऊतिरमित्रहन् मक्षूजवस्तमासति । तया नो हिनुही रथम् १४
स रथेन रथीतमो ऽस्माकेनाभियुग्वना । जेषि जिष्णो हितं धनम् १५
य एक इत् तमु ष्टुहि कृष्टीनां विचर्षणिः । पतिर्जज्ञे वृषक्रतुः १६
यो गृणतामिदासिथापिरूती शिवः सखा । स त्वं न इन्द्र मृळय १७
धिष्व वज्रं गभस्त्यो रक्षोहत्याय वज्रिवः । सासहीष्ठा अभि स्पृधः १८
प्रत्नं रयीणां युजं सखायं कीरिचोदनम् । ब्रह्मवाहस्तमं हुवे १९
स हि विश्वानि पार्थिवाँ एको वसूनि पत्यते । गिर्वणस्तमो अध्रिगुः २०
स नो नियुद्भिरा पृण कामं वाजेभिरश्विभिः । गोमद्भिर्गोपते धृषत् २१
तद् वो गाय सुते सचा पुरुहूताय सत्वने । शं यद् गवे न शाकिने २२
न घा वसुर्नि यमते दानं वाजस्य गोमतः । यत् सीमुप श्रवद् गिरः २३
कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् । शचीभिरप नो वरत् २४
इमा उ त्वा शतक्रतो ऽभि प्र णोनुवुर्गिरः । इन्द्र वत्सं न मातरः २५
दूणाशं सख्यं तव गौरसि वीर गव्यते । अश्वो अश्वायते भव २६
स मन्दस्वा ह्यन्धसो राधसे तन्वा महे । न स्तोतारं निदे करः २७
इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः । वत्सं गावो न धेनवः २८
पुरूतमं पुरूणां स्तोतॄणां विवाचि । वाजेभिर्वाजयताम् २९
अस्माकमिन्द्र भूतु ते स्तोमो वाहिष्ठो अन्तमः । अस्मान् राये महे हिनु ३०
अधि बृबुः पणीनां वर्षिष्ठे मूर्धन्नस्थात् । उरुः कक्षो न गाङ्ग्यः ३१
यस्य वायोरिव द्रवद् भद्रा रातिः सहस्रिणी । सद्यो दानाय मंहते ३२
तत् सु नो विश्वे अर्य आ सदा गृणन्ति कारवः ।
बृबुं सहस्रदातमं सूरिं सहस्रसातमम् ३३

## (४६) षट्चत्वारिंशं सूक्तम्

(१-१४) चतुर्दशर्चस्यास्य सूक्तस्य बार्हस्पत्यः शंयुर्ऋषिः । इन्द्रो देवता ।
प्रगाथः (विषमर्चां बृहती, समर्चां सतोबृहती) छन्दः

त्वामिद्धि हवामहे साता वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः १
स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।

गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे २
यः संत्राहा विचर्षणि रिन्द्रं तं हूमहे वयम् ।
सहस्रमुष्क तुविनृम्ण सत्पते भवा समत्सु नो वृधे ३
बाधसे जनान् वृषभेव मन्युना घृषौ मीळ्ह ऋचीषम ।
अस्माकं बोध्यविता महाधने तनूष्वप्सु सूर्ये ४
इन्द्र ज्येष्ठं न आ भरँ ओजिष्ठं पपुरि श्रवः ।
येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः ५
त्वामुग्रमवसे चर्षणीसहं राजन् देवेषु हूमहे ।
विश्वा सु नो विथुरा पिब्दना वसो ऽमित्रान् त्सुषहान् कृधि ६
यदिन्द्र नाहुषीष्वाँ ओजो नृम्णं च कृष्टिषु ।
यद् वा पञ्च क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या ७
यद् वा तृक्षौ मघवन् द्रुह्यावा जने यत् पूरौ कच्च वृष्ण्यम् ।
अस्मभ्यं तद् रिरीहि सं नृषाह्ये ऽमित्रान् पृत्सु तुर्वणे ८
इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत् ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ९
ये गव्यता मनसा शत्रुमादभु रभिप्रघ्नन्ति धृष्णुया ।
अध स्मा नो मघवन्निन्द्र गिर्वण स्तनूपा अन्तमो भव १०
अध स्मा नो वृधे भवे न्द्र नायमवा युधि ।
यदन्तरिक्षे पतयन्ति पर्णिनो दिद्यवस्तिग्ममूर्धानः ११
यत्र शूरासस्तन्वो वितन्वते प्रिया शर्म पितॄणाम् ।
अध स्मा यच्छ तन्वे३ तने च छर्दि रचित्तं यावय द्वेषः १२
यदिन्द्र सर्गे अर्वत श्चोदयासे महाधने ।
असमने अध्वनि वृजिने पथि श्येनाँ इव श्रवस्यतः १३
सिन्धूँरिव प्रवण आशुया यतो यदि क्लोशमनु ष्वणि ।
आ ये वयो न वर्वृतत्यामिषि गृभीता बाह्वोर्गवि १४

(४७) सप्तचत्वारिंशं सूक्तम्

(१-३१) एकत्रिंशदृचस्यास्य सूक्तस्य भारद्वाजो गर्ग ऋषिः । (१-५) प्रथमादिपञ्चर्चां सोमः, (६-१९, २१) षष्ठ्यादिचतुर्दशानामेकविंश्याश्चेन्द्रः, (२०) विंश्याः प्रथमपादस्य देवाः, द्वितीयपादस्य भूमिः, तृतीयपादस्य बृहस्पतिः,

चतुर्थपादस्य चेन्द्रः, (२२-२५) द्वाविंश्यादिचतसृणां साञ्जयस्य प्रस्तोकस्य दानस्तुतिः, (२६-२८) षड्विंश्यादितृचस्य रथः, (२९-३१) एकोनत्रिंश्यादितृचस्य दुन्दुभिः, (३१) एकत्रिंश्या उत्तरार्धस्य च इन्द्रो देवताः । (१-१८, २०-२२, २६, २८-३१) प्रथमाद्यष्टादशर्चां विंश्यादितृचस्य षड्विंश्या अष्टाविंश्यादिचतसृणाञ्च त्रिष्टुप्, (१९) एकोनविंश्या बृहती, (२३) त्रयोविंश्या अनुष्टुप्, (२४) चतुर्विंश्या गायत्री, (२५) पञ्चविंश्या द्विपदा त्रिष्टुप्, (२७) सप्तविंश्याश्च जगती छन्दांसि

स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम् ।
उतो न्वस्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु १
अयं स्वादुरिह मदिष्ठ आस यस्येन्द्रो वृत्रहत्ये ममाद ।
पुरूणि यश्च्यौत्ना शम्बरस्य वि नवतिं नव च देह्यो३ हन् २
अयं मे पीत उदियर्ति वाच मयं मनीषामुशतीमजीगः ।
अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे ३
अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः ।
अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्व१न्तरिक्षम् ४
अयं विदच्चित्रदृशीकमर्णः शुक्रसद्मनामुषसामनीके ।
अयं महान् महता स्कम्भनेनोद् द्यामस्तभ्नाद् वृषभो मरुत्वान् ५
धृषत् पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम् ।
माध्यन्दिने सवन आ वृषस्व रयिस्थानो रयिमस्मासु धेहि ६
इन्द्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ ।
भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः ७
उरुं नो लोकमनु नेषि विद्वान् त्स्वर्वज्ज्योतिरभयं स्वस्ति ।
ऋष्वा त इन्द्र स्थविरस्य बाहू उप स्थेयाम शरणा बृहन्ता ८
वरिष्ठे न इन्द्र वन्धुरे धा वहिष्ठयोः शतावन्नश्वयोरा ।
इषमा वक्षीषां वर्षिष्ठां मा नस्तारीन्मघवन् रायो अर्यः ९
इन्द्र मृळ मह्यं जीवातुमिच्छ चोदय धियमयसो न धाराम् ।
यत् किं चाहं त्वायुरिदं वदामि तज्जुषस्व कृधि मा देववन्तम् १०
त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ११
इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।

बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम १२
तस्य वयं सुमतौ यज्ञियस्याऽपि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु १३
अव त्वे इन्द्र प्रवतो नोर्मिर्गिरो ब्रह्माणि नियुतो धवन्ते ।
उरू न राधः सवना पुरूरयपो गा वज्रिन् युवसे समिन्दून् १४
क ईं स्तवत् कः पृणात् को यजाते यदुग्रमिन्मघवा विश्वहावेत् ।
पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः १५
शृरवे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः ।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् १६
परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति ।
अनानुभूतीरवधून्वानः पूर्वीरिन्द्रः शरदस्तर्तरीति १७
रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश १८
युजानो हरिता रथे भूरि त्वष्टेह राजति ।
को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु १९
अगव्यूति क्षेत्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत् ।
बृहस्पते प्र चिकित्सा गविष्टावित्था सते जरित्र इन्द्र पन्थाम् २०
दिवेदिवे सदृशीरन्यमर्धं कृष्णा असेधदप सद्मनो जाः ।
अहन् दासा वृषभो वस्नयन्तोदव्रजे वर्चिनं शम्बरं च २१
प्रस्तोक इन्नु राधसस्त इन्द्र दश कोशयीर्दश वाजिनोऽदात् ।
दिवोदासादतिथिग्वस्य राधः शाम्बरं वसु प्रत्यग्रभीष्म २२
दशाश्वान् दश कोशान् दश वस्त्राधिभोजना ।
दशो हिरगयपिराडान् दिवोदासादसानिषम् २३
दश रथान् प्रष्टिमतः शतं गा अथर्वभ्यः ।
अश्वथः पायवेऽदात् २४
महि राधो विश्वजन्यं दधानान् भरद्वाजान् त्सार्ञ्जयो अभ्ययष्ट २५
वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीळयस्वाऽऽस्थाता ते जयतु जेत्वानि २६
दिवस्पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज २७

इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय २८
उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवै दूराद् दवीयो अप सेध शत्रून् २९
आ क्रन्दय बलमोजो न आ धा निः ष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीळयस्व ३०
आमूरज प्रत्यावर्तयेमाः केतुमद् दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरो ऽस्माकमिन्द्र रथिनो जयन्तु ३१

अथाष्टमोऽध्यायः

व० १ ।३२

(४८) अष्टचत्वारिंशं सूक्तम्

(१-२२) द्वाविंशत्यृचस्यास्य सूक्तस्य बार्हस्पत्यः शंयुर्ऋषिः । (१-१०) प्रथमादिदशर्चामग्निः, (११-१५, २०-२१) एकादश्यादिपञ्चानां विंश्येकविंश्योश्च मरुतः ( (१३-१५) त्रयोदश्यादितृचस्य लिङ्गोक्ता वा ), (१३-१९) षोडश्यादिचतसृणां पूषा, (२२) द्वाविंश्याश्च द्यावाभूमी वा पृश्निर्वा देवताः । (१-१२) प्रथमादिद्वादशर्चां प्रगाथः ( (१, ३, ५, ९) प्रथमातृतीयापञ्चमीनवमीनां बृहती, (२, ४, १०, १२) द्वितीयाचतुर्थीदशमीद्वादशीनां सतोबृहती, (६, ८) षष्ठ्यष्टम्योर्महासतोबृहती, (७) सप्तम्या महाबृहती, (११) एकादश्याश्च ककुप्), (१३, १८) त्रयोदश्यष्टादश्योः पुर उष्णिक, (१४, १९-२०) चतुर्दश्येकोनविंशीविंशीनां बृहती, (१५) पञ्चदश्या अतिजगती, (१६) षोडश्याः ककुप्, (१७) सप्तदश्याः सतोबृहती, (२१) एकविंश्या यवमध्या महाबृहती, (२२) द्वाविंश्याश्चानुष्टुप् छन्दांसि

यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् १
ऊर्जो नपातं स हिनायमस्मयु र्दाशेम हव्यदातये ।
भुवद् वाजेष्वविता भुवद् वृध उत त्राता तनूनाम् २
वृषा ह्यग्ने अजरो महान् विभास्यर्चिषा ।
अजस्रेण शोचिषा शोशुचच्छुचे सुदीतिभिः सु दीदिहि ३
महो देवान् यजसि यक्ष्यानुषक् तव क्रत्वोत दंसना ।
अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वंस्व ४

यमापो अद्रयो वना गर्भमृतस्य पिप्रति ।
सहसा यो मथितो जायते नृभिः पृथिव्या अधि सानवि ५
आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि ।
तिरस्तमो ददृश ऊर्म्यास्वा श्यावास्वरुषो वृषा श्यावा अरुषो वृषा ६
बृहद्भिरग्ने अर्चिभिः शक्रेण देव शोचिषा ।
भरद्वाजे समिधानो यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत् पावक दीदिहि ७
विश्वासां गृहपतिर्विशामसि त्वमग्ने मानुषीणाम् ।
शतं पूर्भिर्यविष्ठ पाह्यंहसः समेद्धारं शतं हिमा स्तोतृभ्यो ये च ददति ८
त्वं नश्चित्र ऊत्या वसो राधांसि चोदय ।
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ९
पर्षि तोकं तनयं पर्तृभिष्ट्व मदब्धैरप्रयुत्वभिः ।
अग्ने हेळांसि दैव्या युयोधि नो ऽदेवानि ह्वरांसि च १०
आ सखायः सबर्दुघां धेनुमजध्वमुप नव्यसा वचः । सृजध्वमनपस्फुराम्
११
या शर्धाय मारुताय स्वभानवे श्रवोऽमृत्यु धुक्षत ।
या मृळीके मरुतां तुराणां या सुम्नैरेवयावरी १२
भरद्वाजायाव धुक्षत द्विता ।
धेनुं च विश्वदोहस मिषं च विश्वभोजसम् १३
तं व इन्द्रं न सुक्रतुं वरुणमिव मायिनम् ।
अर्यमणं न मन्द्रं सृप्रभोजसं विष्णुं न स्तुष आदिशे १४
त्वेषं शर्धो न मारुतं तुविष्व ण्यनर्वाणं पूषणं सं यथा शता ।
सं सहस्रा कारिषच्चर्षणिभ्य आँ आविर्गूळहा वसू करत् सुवेदा नो वसू
करत् १५
आ मा पूषन्नुप द्रव शंसिषं नु ते अपिकर्ण आघृणे ।
अघा अर्यो अरातयः १६
मा काकम्बीरमुद् वृहो वनस्पति मशस्तीर्वि हि नीनशः ।
मोत सूरो अह एवा चन ग्रीवा आदधते वेः १७
दृतेरिव तेऽवृकमस्तु सख्यम् ।
अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः १८
परो हि मर्त्यैरसि समो देवैरुत श्रिया ।

अभि स्व्यः पूषन् पृतनासु नस्त्व मवा नूनं यथा पुरा १९
वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता ।
देवस्य वा मरुतो मर्त्यस्य वे जानस्य प्रयज्यवः २०
सद्यश्चिद् यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः ।
त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः २१
सकृद्ध द्यौरजायत सकृद् भूमिरजायत ।
पृश्न्या दुग्धं सकृत् पय स्तदन्यो नानु जायते २२

(४९) एकोनपञ्चाशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य भारद्वाज ऋजिश्वा ऋषिः । विश्वे देवा देवताः ।
(१-१४) प्रथमादिचतुर्दशर्चां त्रिष्टुप्, (१५) पञ्चदश्याश्च शक्वरी छन्दसी

स्तुषे जनं सुव्रतं नव्यसीभि र्गीर्भिर्मित्रावरुणा सुम्नयन्ता ।
त आ गमन्तु त इह श्रुवन्तु सुक्षत्रासो वरुणो मित्रो अग्निः १
विशोविश ईड्यमध्वरे ष्वदृप्तक्रतुमरतिं युवत्योः ।
दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै २
अरुषस्य दुहितरा विरूपे स्तृभिरन्या पिपिशे सूरो अन्या ।
मिथस्तुरा विचरन्ती पावके मन्म श्रुतं नक्षत ऋच्यमाने ३
प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ४
स मे वपुश्छदयदश्विनोर्यो रथो विरुक्मान् मनसा युजानः ।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ५
पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि ।
सत्यश्रुतः कवयो यस्य गीर्भि र्जगतः स्थातर्जगदा कृणुध्वम् ६
पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।
ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत् ७
पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम् ।
स नो रासच्छुरुधश्चन्द्राग्रा धियंधियं सीषधाति प्र पूषा ८
प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिमृभ्वम् ।
होता यक्षद् यजतं पस्त्याना मग्निस्त्वष्टारं सुहवं विभावा ९
भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ ।

बृहन्तमृष्वमजरं सुषुम्न मृधग्घुवेम कविनैषितासः १०
आ युवानः कवयो यज्ञियासो मरुतो गन्त गृणतो वरस्याम् ।
अचित्रं चिद्धि जिन्वथा वृधन्त इत्था नक्षन्तो नरो अङ्गिरस्वत् ११
प्र वीराय प्र तवसे तुराया ऽजा यूथेव पशुरक्षिरस्तम् ।
स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वचनस्य विपः १२
यो रजांसि विममे पार्थिवानि त्रिश्चिद् विष्णुर्मनवे बाधिताय ।
तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा३ तना च १३
तन्नोऽहिर्बुध्न्यो अद्भिरर्कै स्तत् पर्वतस्तत् सविता चनो धात् ।
तदोषधीभिरभि रातिषाचो भगः पुरंधिर्जिन्वतु प्र राये १४
नु नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपाम् ।
क्षयं दाताजरं येन जनान् त्स्पृधो अदेवीरभि च क्रमाम विश
आदेवीरभ्यश्नवाम १५

पञ्चमोऽनुवाकः

सू० ५० । ६१

(५०) पञ्चाशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य भारद्वाज ऋजिश्वा ऋषिः । विश्वे देवा देवताः ।
त्रिष्टुप् छन्दः

हुवे वो देवीमदितिं नमोभि र्मृळीकाय वरुणं मित्रमग्निम् ।
अभिक्षदामर्यमणं सुशेवं त्रातॄन् देवान् त्सवितारं भगं च १
सुज्योतिषः सूर्य दक्षपितॄ ननागास्त्वे सुमहो वीहि देवान् ।
द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः २
उत द्यावापृथिवी क्षत्रमुरु बृहद् रोदसी शरणं सुषुम्ने ।
महस्करथो वरिवो यथा नो ऽस्मे क्षयाय धिषणे अनेहः ३
आ नो रुद्रस्य सूनवो नमन्ता मद्या हूतासो वसवोऽधृष्टाः ।
यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान् ४
मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा ।
श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते ५
अभि त्यं वीरं गिर्वणसमर्चे न्द्रं ब्रह्मणा जरितर्नवेन ।
श्रवदिद्धवमुप च स्तवानो रासद् वाजाँ उप महो गृणानः ६

ओमानमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः ।
यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ७
आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात् ।
यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ८
उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ।
स्यामहं ते सदमिद् रातौ तव स्यामग्नेऽवसा सुवीरः ९
उत त्या मे हवमा जग्म्यातं नासत्या धीभिर्युवमङ्ग विप्रा ।
अत्रिं न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके १०
ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः ।
दशस्यन्तो दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः ११
ते नो रुद्रः सरस्वती सजोषा मीळ्हुष्मन्तो विष्णुर्मृळन्तु वायुः ।
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः १२
उत स्य देवः सविता भगो नो ऽपां नपादवतु दानु पप्रिः ।
त्वष्टा देवेभिर्जनिभिः सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः १३
उत नोऽहिर्बुध्न्यः शृणो त्वज एकपात् पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु १४
एवा नपातो मम तस्य धीभि र्भरद्वाजा अभ्यर्चन्त्यर्कैः ।
ग्ना हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः १५

## (५१) एकपञ्चाशं सूक्तम्

(१-१६) षोडशर्चस्यास्य सूक्तस्य भारद्वाज ऋजिश्वा ऋषिः । विश्वे देवा देवताः ।
(१-१२) प्रथमादिद्वादशर्चां त्रिष्टुप्, (१३-१५) त्रयोदश्यादितृचस्योष्णिक्, (१६) षोडश्याश्चानुष्टुप् छन्दांसि

उदु त्यच्चक्षुर्महि मित्रयोराँ एति प्रियं वरुणयोरदब्धम् ।
ऋतस्य शुचि दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत् १
वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः ।
ऋजु मर्तेषु वृजिना च पश्य न्नभि चष्टे सूरो अर्य एवान् २
स्तुष उ वो मह ऋतस्य गोपा नदितिं मित्रं वरुणं सुजातान् ।
अर्यमणं भगमदब्धधीती नच्छा वोचे सधन्यः पावकान् ३
रिशादसः सत्पतीँरदब्धान् महो राज्ञः सुवसनस्य दातॄन् ।

यूनः सुक्षत्रान् क्षयतो दिवो नॄनादित्यान् याम्यदितिं दुवोयु ४
द्यौ३ष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृळता नः ।
विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त ५
मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः ।
यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव ६
मा व एनो अन्यकृतं भुजेम मा तत् कर्म वसवो यच्चयध्वे ।
विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रीरिषीष्ट ७
नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम् ।
नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे ८
ऋतस्य वो रथ्यः पूतदक्षानृतस्य पस्त्यसदो अदब्धान् ।
ताँ आ नमोभिरुरुचक्षसो नॄन् विश्वान्व आ नमे महो यजत्राः ९
ते हि श्रेष्ठवर्चसस्त उ नस्तिरो विश्वानि दुरिता नयन्ति ।
सुक्षत्रासो वरुणो मित्रो अग्निरृतधीतयो वक्मराजसत्याः १०
ते न इन्द्रः पृथिवी क्षाम वर्धन् पूषा भगो अदितिः पञ्च जनाः ।
सुशर्माणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः ११
नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता ।
आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्ववन्द १२
अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् ।
दविष्ठमस्य सत्पते कृधी सुगम् १३
ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः ।
जही न्यत्रिणं पणिं वृको हि षः १४
यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः ।
कर्ता नो अध्वन्ना सुगं गोपा अमा १५
अपि पन्थामगन्महि स्वस्तिगामनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु १६

(५२) द्विपञ्चाशं सूक्तम्

(१-१७) सप्तदशर्चस्यास्य सूक्तस्य भारद्वाज ऋजिश्वा ऋषिः । विश्वे देवा देवताः । (१-६, १३, १५-१७) प्रथमादितृचद्वयस्य त्रयोदश्या ऋचः पञ्चदश्यादितृचस्य च त्रिष्टुप्, (७-१२) सप्तम्यादितृचद्वयस्य गायत्री, (१४) चतुर्दश्याश्च

जगती छन्दांसि

न तद् दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः ।
उब्जन्तु तं सुभ्वः पर्वतासो नि हीयतामतियाजस्य यष्टा १
अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात् ।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः २
किमङ्ग त्वा ब्रह्मणः सोम गोपां किमङ्ग त्वाहुरभिशस्तिपां नः ।
किमङ्ग नः पश्यसि निद्यमानान् ब्रह्मद्विषे तपुषिं हेतिमस्य ३
अवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः ।
अवन्तु मा पर्वतासो ध्रुवासो ऽवन्तु मा पितरो देवहूतौ ४
विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम् ।
तथा करद् वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः ५
इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना ।
पर्जन्यो न ओषधीभिर्मयोभु रग्निः सुशंसः सुहवः पितेव ६
विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ७
यो वो देवा घृतस्नुना हव्येन प्रतिभूषति । तं विश्व उप गच्छथ ८
उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृळीका भवन्तु नः ९
विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यं पयः १०
स्तोत्रमिन्द्रो मरुद्गण स्त्वष्टृमान् मित्रो अर्यमा । इमा हव्या जुषन्त नः ११
इमं नो अग्ने अध्वरं होतर्वयुनशो यज । चिकित्वान् दैव्यं जनम् १२
विश्वे देवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम् १३
विश्वे देवा मम शृण्वन्तु यज्ञिया उभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद् वो अन्तमा मदेम १४
ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे ।
ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यन्तु देवाः १५
अग्नीपर्जन्याववतं धियं मे ऽस्मिन् हवे सुहवा सुष्टुतिं नः ।
इळामन्यो जनयद् गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे १६
स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे ।
अस्मिन् नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वम् १७

(५३) त्रिपञ्चाशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । पूषा देवता । (१-७, ९-१०) प्रथमादिसप्तर्चां नवमीदशम्योश्च गायत्री, (८) अष्टम्याश्चानुष्टुप् छन्दसी

वयमु त्वा पथस्पते रथं न वाजसातये । धिये पूषन्नयुज्महि १
अभि नो नर्यं वसु वीरं प्रयतदक्षिणम् । वामं गृहपतिं नय २
अदित्सन्तं चिदाघृणे पूषन् दानाय चोदय । पणेश्चिद् वि म्रदा मनः ३
वि पथो वाजसातये चिनुहि वि मृधो जहि । साधन्तामुग्र नो धियः ४
परि तृन्धि पणीना मारया हृदया कवे । अथेमस्मभ्यं रन्धय ५
वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियम् । अथेमस्मभ्यं रन्धय ६
आ रिख किकिरा कृणु पणीनां हृदया कवे । अथेमस्मभ्यं रन्धय ७
यां पूषन् ब्रह्मचोदनी मारां बिभर्ष्याघृणे ।
तया समस्य हृदय मा रिख किकिरा कृणु ८
या ते अष्ट्रा गोओपशा ऽऽघृणे पशुसाधनी । तस्यास्ते सुम्नमीमहे ९
उत नो गोषणिं धिय मश्वसां वाजसामुत । नृवत् कृणुहि वीतये १०

(५४) चतुष्पञ्चाशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । पूषा देवता । गायत्री छन्दः

सं पूषन् विदुषा नय यो अञ्जसानुशासति । य एवेदमिति ब्रवत् १
समु पूष्णा गमेमहि यो गृहाँ अभिशासति । इम एवेति च ब्रवत् २
पूष्णश्चक्रं न रिष्यति न कोशोऽव पद्यते । नो अस्य व्यथते पविः ३
यो अस्मै हविषाविध न्न तं पूषापि मृष्यते । प्रथमो विन्दते वसु ४
पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजं सनोतु नः ५
पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः । अस्माकं स्तुवतामुत ६
माकिर्नेशन्माकीं रिष न्माकीं सं शारि केवटे । अथारिष्टाभिरा गहि ७
शृण्वन्तं पूषणं वय मिर्यमनष्टवेदसम् । ईशानं राय ईमहे ८
पूषन्तव व्रते वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ९
परि पूषा परस्ता द्धस्तं दधातु दक्षिणम् । पुनर्नो नष्टमाजतु १०

(५५) पञ्चपञ्चाशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । पूषा देवता ।
गायत्री छन्दः

एहि वां विमुचो नपादाघृणे सं सचावहै । रथीऋृतस्य नो भव १
रथीतमं कपर्दिन मीशानं राधसो महः । रायः सखायमीमहे २
रायो धारास्याघृणे वसो राशिरजाश्व । धीवतोधीवतः सखा ३
पूषणं न्वजाश्व मुप स्तोषाम वाजिनम् । स्वसुर्यो जार उच्यते ४
मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः । भ्रातेन्द्रस्य सखा मम ५
आजासः पूषणं रथे निशृम्भास्ते जनश्रियम् । देवं वहन्तु बिभ्रतः ६

## (५६) षट्पञ्चाशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । पूषा देवता । (१-५)
प्रथमादिपञ्चर्चां गायत्री, (६) षष्ठ्याश्चानुष्टुप् छन्दसी

य एनमादिदेशति करम्भादिति पूषणम् । न तेन देव आदिशे १
उत घा स रथीतमः सख्या सत्पतिर्युजा । इन्द्रो वृत्राणि जिघ्नते २
उतादः परुषे गवि सूरश्चक्रं हिरण्ययम् । न्यैरयद् रथीतमः ३
यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः । तत् सु नो मन्म साधय ४
इमं च नो गवेषणं सातये सीषधो गणम् । आरात् पूषन्नसि श्रुतः ५
आ ते स्वस्तिमीमह आरेअघामुपावसुम् । अद्या च सर्वतातये श्वश्च
सर्वतातये ६

## (५७) सप्तपञ्चाशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रापूषणौ देवते ।
गायत्री छन्दः

इन्द्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये १
सोममन्य उपासदत् पातवे चम्वोः सुतम् । करम्भमन्य इच्छति २
अजा अन्यस्य वह्नयो हरी अन्यस्य संभृता । ताभ्यां वृत्राणि जिघ्नते ३
यदिन्द्रो अनयद् रितो महीरपो वृषन्तमः । तत्र पूषाभवत् सचा ४
तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव । इन्द्रस्य चा रभामहे ५
उत् पूषणं युवामहे ऽभीशूँरिव सारथिः । मह्या इन्द्रं स्वस्तये ६

(५८) अष्टपञ्चाशं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । पूषा देवता । (१, ३-४) प्रथमर्चस्तृतीयाचतुर्थ्योश्च त्रिष्टुप्, (२) द्वितीयायाश्च जगती छन्दसी

शुक्रं ते अन्यद् यजतं ते अन्यद् विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु १
अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत् संचक्षाणो भुवना देव ईयते २
यास्ते पूषन्नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति ।
ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ३
पूषा सुबन्धुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः ।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वञ्चम् ४

(५९) एकोनषष्टितमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्राग्नी देवते । (१-६) प्रथमादितृचद्वयस्य बृहती, (७-१०) सप्तम्यादिचतुर्ऋचाञ्चानुष्टुप् छन्दसी

प्र नु वोचा सुतेषु वां वीर्या३ यानि चक्रथुः ।
हतासो वां पितरो देवशत्रव इन्द्राग्नी जीवथो युवम् १
बळित्था महिमा वामिन्द्राग्नी पनिष्ठ आ ।
समानो वां जनिता भ्रातरा युवं यमाविहेहमातरा २
ओकिवांसा सुते सचाँ अश्वा सप्ती इवादने ।
इन्द्रा न्व१ग्नी अवसेह वज्रिणा वयं देवा हवामहे ३
य इन्द्राग्नी सुतेषु वां स्तवत् तेष्वृतावृधा ।
जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन ४
इन्द्राग्नी को अस्य वां देवौ मर्तश्चिकेतति ।
विषूचो अश्वान् युयुजान ईयत एकः समान आ रथे ५
इन्द्राग्नी अपादियं पूर्वागात् पद्वतीभ्यः ।
हित्वी शिरो जिह्वया वावदच्चरत् त्रिंशत् पदा न्यक्रमीत् ६
इन्द्राग्नी आ हि तन्वते नरो धन्वानि बाह्वोः ।
मा नो अस्मिन् महाधने परा वर्क्तं गविष्टिषु ७
इन्द्राग्नी तपन्ति माऽघा अर्यो अरातयः ।

अप द्वेषांस्या कृतं युयुतं सूर्यादधि ८
इन्द्राग्नी युवोरपि वसु दिव्यानि पार्थिवा ।
आ न इह प्र यच्छतं रयिं विश्वायुपोषसम् ९
इन्द्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता ।
विश्वाभिर्गीर्भिरा गत मस्य सोमस्य पीतये १०

(६०) षष्टितमं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्राग्नी देवते ।
(१-३, १३) प्रथमादितृचस्य त्रयोदश्या ऋचश्च त्रिष्टुप्, (४-१२) चतुर्थ्यादिनवानां
गायत्री, (१४) चतुर्दश्या बृहती, (१५) पञ्चदश्याश्चानुष्टुप् छन्दांसि

श्नथद् वृत्रमुत सनोति वाज मिन्द्रा यो अग्नी सहुरी सपर्यात् ।
इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता १
ता योधिष्टमभि गा इन्द्र नून मपः स्वरुषसो अग्न ऊळ्हाः ।
दिशः स्वरुषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान् २
आ वृत्रहणा वृत्रहभिः शुष्मै रिन्द्र यातं नमोभिरग्ने अर्वाक् ।
युवं राधोभिरकवेभिरिन्द्रा ग्ने अस्मे भवतमुत्तमेभिः ३
ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम् । इन्द्राग्नी न मर्धतः ४
उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृळात ईदृशे ५
हतो वृत्राण्यार्या हतो दासानि सत्पती । हतो विश्वा अप द्विषः ६
इन्द्राग्नी युवामिमे ऽभि स्तोमा अनूषत । पिबतं शंभुवा सुतम् ७
या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा । इन्द्राग्नी ताभिरा गतम् ८
ताभिरा गच्छतं नरो पेदं सवनं सुतम् । इन्द्राग्नी सोमपीतये ९
तमीळिष्व यो अर्चिषा वना विश्वा परिष्वजत् । कृष्णा कृणोति जिह्वया १०
य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः । द्युम्नाय सुतरा अपः ११
ता नो वाजवतीरिष आशून् पिपृतमर्वतः । इन्द्रमग्निं च वोळ्हवे १२
उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दाताराविषां रयीणा मुभा वाजस्य सातये हुवे वाम् १३
आ नो गव्येभिरश्व्यै र्वसव्यै३रुप गच्छतम् ।
सखायौ देवौ सख्याय शंभुवे न्द्राग्नी ता हवामहे १४
इन्द्राग्नी शृणुतं हवं यजमानस्य सुन्वतः ।

वीतं हव्यान्या गतं पिबतं सोम्यं मधु १५

(६१) एकषष्टितमं सूक्तम्

(१-१४) चतुर्दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । सरस्वती देवता । (१-३, १३) प्रथमादितृचस्य त्रयोदश्या ऋचश्च जगती, (४-१२) चतुर्थ्यादिनवानां गायत्री, (१४) चतुर्दश्याश्च त्रिष्टुप् छन्दांसि

इयमददाद् रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे ।
या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति १
इयं शुष्मेभिर्बिसखा इवारुजत् सानु गिरीणां तविषेभिरूर्मिभिः ।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः २
सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः ।
उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो अस्रवो वाजिनीवति ३
प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ४
यस्त्वा देवि सरस्वत्युपब्रूते धने हिते । इन्द्रं न वृत्रतूर्ये ५
त्वं देवि सरस्वत्यवा वाजेषु वाजिनि । रदा पूषेव नः सनिम् ६
उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः । वृत्रघ्नी वष्टि सुष्टुतिम् ७
यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः । अमश्चरति रोरुवत् ८
सा नो विश्वा अति द्विषः स्वसॄरन्या ऋतावरी । अतन्नहेव सूर्यः ९
उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा । सरस्वती स्तोम्या भूत् १०
आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम् । सरस्वती निदस्पातु ११
त्रिषधस्था सप्तधातुः पञ्च जाता वर्धयन्ती । वाजेवाजे हव्या भूत् १२
प्र या महिम्ना महिनासु चेकिते द्युम्नेभिरन्या अपसामपस्तमा ।
रथ इव बृहती विभ्वने कृतोपस्तुत्या चिकितुषा सरस्वती १३
सरस्वत्यभि नो नेषि वस्यो माप स्फरीः पयसा मा न आ धक् ।
जुषस्व नः सख्या वेश्या च मा त्वत् क्षेत्राण्यरणानि गन्म १४

इति चतुर्थोऽष्टकः

षष्ठोऽनुवाकः । सू० ६२-७५

प्रथमोऽध्यायः व० १ ।२७

(६२) द्विषष्टितमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अश्विनौ देवते ।
त्रिष्टुप् छन्दः

स्तुषे नरा दिवो अस्य प्रसन्ताऽश्विना हुवे जरमाणो अर्कैः ।
या सद्य उस्रा व्युषि ज्मो अन्तान् युयूषतः पर्युरू वरांसि १
ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः ।
पुरू वरांस्यमिता मिमानाऽपो धन्वान्यति याथो अज्रान् २
ता ह त्यद् वर्तिर्यदरध्रमुग्रेत्था धिय ऊहथुः शश्वदश्वैः ।
मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य ३
ता नव्यसो जरमाणस्य मन्मोप भूषतो युयुजानसप्ती ।
शुभं पृक्षमिषमूर्जं वहन्ता होता यक्षत् प्रत्नो अध्रुग्युवाना ४
ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा विवासे ।
या शंसते स्तुवते शंभविष्ठा बभूवतुर्गृणते चित्रराती ५
ता भुज्युं विभिरद्भ्यः समुद्रात् तुग्रस्य सूनुमूहथू रजोभिः ।
अरेणुभिर्योजनेभिर्भुजन्ता पतत्रिभिरर्णसो निरुपस्थात् ६
वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः ।
दशस्यन्ता शयवे पिप्यथुर्गामिति च्यवाना सुमतिं भुरण्यू ७
यद् रोदसी प्रदिवो अस्ति भूमा हेळो देवानामुत मर्त्यत्रा ।
तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात ८
य ईं राजानावृतुथा विदधद् रजसो मित्रो वरुणश्चिकेतत् ।
गम्भीराय रक्षसे हेतिमस्य द्रोघाय चिद् वचस आनवाय ९
अन्तरैश्चक्रैस्तनयाय वर्तिर्द्युमता यातं नृवता रथेन ।
सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तम् १०
आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् ।
दृळहस्य चिद् गोमतो वि व्रजस्य दुरो वर्तं गृणते चित्रराती ११

## (६३) त्रिषष्टितमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अश्विनौ देवते ।
(१-१०) प्रथमादिदशर्चां त्रिष्टुप्, (११) एकादश्याश्चैकपदा त्रिष्टुप् छन्दसी

क्व१ त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदन्नमस्वान् ।
आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मन्मन् १

अरं मे गन्तं हवनायास्मै गृणाना यथा पिबाथो अन्धः ।
परि ह त्यद् वर्तिर्याथो रिषो न यत् परो नान्तरस्तुतुर्यात् २
अकारि वामन्धसो वरीमन्नस्तारि बर्हिः सुप्रायणतमम् ।
उत्तानहस्तो युवयुर्ववन्दा ऽऽ वां नक्षन्तो अद्रय आञ्जन् ३
ऊर्ध्वो वामग्निरध्वरेष्वस्थात् प्र रातिरेति जूर्णिनी घृताची ।
प्र होता गूर्तमना उराणो ऽयुक्त यो नासत्या हवीमन् ४
अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिम् ।
प्र मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन् यज्ञियानाम् ५
युवं श्रीभिर्दर्शताभिराभिः शुभे पुष्टिमूहथुः सूर्यायाः ।
प्र वां वयो वपुषेऽनु पप्तन् नक्षद् वाणी सुष्टुता धिष्णया वाम् ६
आ वां वयोऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहन्तु ।
प्र वां रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः ७
पुरु हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसक्राम् ।
स्तुतश्च वां माध्वी सुष्टुतिश्चरसाश्च ये वामनु रातिमग्मन् ८
उत म ऋज्रे पुरयस्य रघ्वी सुमीळहे शतं पेरुके च पक्वा ।
शाराडो दाद्धिरणिनः स्मद्दिष्टीन् दश वशासो अभिषाच ऋष्वान् ९
सं वां शता नासत्या सहस्रा ऽश्वानां पुरुपन्था गिरे दात् ।
भरद्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः १०
आ वां सुम्ने वरिमन्त्सूरिभिः ष्याम् ११

(६४) चतुःषष्टितमं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । उषा देवता । त्रिष्टुप् छन्दः

उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशन्तः ।
कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा मघोनी १
भद्रा ददृक्ष उर्विया वि भास्युत् ते शोचिर्भानवो द्यामपप्तन् ।
आविर्वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना महोभिः २
वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम् ।
अपेजते शूरो अस्तेव शत्रून् बाधते तमो अजिरो न वोळहा ३
सुगोत ते सुपथा पर्वतेष्ववाते अपस्तरसि स्वभानो ।

सा नृ आ वह पृथुयामन्नृष्वे रयिं दिवो दुहितरिषुयध्यै ४
सा वह योक्षभिरवातो षो वरं वहसि जोषमनु ।
त्वं दिवो दुहितर्या ह देवी पूर्वहूतौ मंहना दर्शता भूः ५
उत् ते वयश्चिद् वसतेरपप्तन् नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाम मुषो देवि दाशुषे मर्त्याय ६

(६५) पञ्चषष्टितमं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । उषा देवता ।
त्रिष्टुप् छन्दः

एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छन्ती मानुषीरजीगः ।
या भानुना रुशता राम्या स्वज्ञायि तिरस्तमसश्चिदक्तून् १
वि तद् ययुररुणयुग्भिरश्वै श्चित्रं भान्त्युषसश्चन्द्ररथाः ।
अग्रं यज्ञस्य बृहतो नयन्ती वि ता बाधन्ते तम ऊर्म्यायाः २
श्रवो वाजमिषमूर्जं वहन्ती र्नि दाशुष उषसो मर्त्याय ।
मघोनीर्वीरवत् पत्यमाना अवो धात विधते रत्नमद्य ३
इदा हि वो विधते रत्नमस्ती दा वीराय दाशुष उषासः ।
इदा विप्राय जरते यदुक्था नि ष्म मावते वहथा पुरा चित् ४
इदा हि त उषो अद्रिसानो गोत्रा गवामङ्गिरसो गृणन्ति ।
व्यर्१्कैण बिभिदुर्ब्रह्मणा च सत्या नृणामभवद् देवहूतिः ५
उच्छा दिवो दुहितः प्रत्नवन्नो भरद्वाजवद् विधते मघोनि ।
सुवीरं रयिं गृणते रिरीह्यु रुगायमधि धेहि श्रवो नः ६

(६६) षट्षष्टितमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । मरुतो देवताः ।
त्रिष्टुप् छन्दः

वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानम् ।
मर्तेष्वन्यद् दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः १
ये अग्नयो न शोशुचन्निधाना द्विर्यत् त्रिर्मरुतो वावृधन्त ।
अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च भूवन् २
रुद्रस्य ये मीळ्हुषः सन्ति पुत्रा यांश्चो नु दाधृविर्भरध्यै ।

विदे हि माता महो मही षा सेत् पृश्निः सुभ्वे३ गर्भमाधात् ३
न य ईषन्ते जनुषोऽया न्वऽन्तः सन्तोऽवद्यानि पुनानाः ।
निर्यद् दुह्रे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ४
मक्षू न येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः ।
न ये स्तौना अयासो मह्ना नू चित् सुदानुरव यासदुग्रान् ५
त इदुग्राः शवसा धृष्णुषेणा उभे युजन्त रोदसी सुमेके ।
अध स्मैषु रोदसी स्वशोचिरामवत्सु तस्थौ न रोकः ६
अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद् यमजत्यरथीः ।
अनवसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन् ७
नास्य वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ ।
तोके वा गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः ८
प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् ।
ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः ९
त्विषीमन्तो अध्वरस्येव दिद्युत् तृषुच्यवसो जुह्वो३ नाग्नेः ।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः १०
तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे ।
दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृध्रन् ११

(६७) सप्तषष्टितमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । मित्रावरुणौ देवते । त्रिष्टुप् छन्दः

विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै ।
सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः १
इयं मद् वां प्र स्तृणीते मनीषोप प्रिया नमसा बर्हिरच्छ ।
यन्तं नो मित्रावरुणावधृष्टं छर्दिर्यद् वां वरूथ्यं सुदानू २
आ यातं मित्रावरुणा सुशस्त्युप प्रिया नमसा हूयमाना ।
सं यावप्नःस्थो अपसेव जनाञ्छ्रुधीयतश्चिद् यतथो महित्वा ३
अश्वा न या वाजिना पूतबन्धू ऋता यद् गर्भमदितिर्भरध्यै ।
प्र या महि महान्ता जायमाना घोरा मर्ताय रिपवे नि दीधः ४

विश्वे यद् वां मंहना मन्दमानाः क्षत्रं देवासो अदधुः सजोषाः ।
परि यद् भूथो रोदसी चिदुर्वी सन्ति स्पशो अदब्धासो अमूराः ५
ता हि क्षत्रं धारयेथे अनु द्यून् दृंहेथे सानुमुपमादिव द्योः ।
दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान् द्यां धासिनायोः ६
ता विग्रं धैथे जठरं पृणध्या आ यत् सद्म सभृतयः पृणन्ति ।
न मृष्यन्ते युवतयोऽवाता वि यत् पयो विश्वजिन्वा भरन्ते ७
ता जिह्वया सदमेदं सुमेधा आ यद् वां सत्यो अरतिर्ऋते भूत् ।
तद् वां महित्वं घृतान्नावस्तु युवं दाशुषे वि चयिष्टमंहः ८
प्र यद् वां मित्रावरुणा स्पूर्धन् प्रिया धाम युवधिता मिनन्ति ।
न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः ९
वि यद् वाचं कीस्तासो भरन्ते शंसन्ति के चिन्निविदो मनानाः ।
आद् वां ब्रवाम सत्यान्युक्था नकिर्देवेभिर्यतथो महित्वा १०
अवोरित्था वां छर्दिषो अभिष्टौ युवोर्मित्रावरुणावस्कृधोयु ।
अनु यद् गावः स्फुरानृजिप्यं धृष्णुं यद् रणे वृषणं युनजन् ११

(६८) अष्टषष्टितमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रावरुणौ देवते । (१-८, ११) प्रथमाद्यष्टर्चामेकादश्याश्च त्रिष्टुप्, (९-१०) नवमीदशम्योश्च जगती छन्दसी

श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद् वृक्तबर्हिषो यजध्यै ।
आ य इन्द्रावरुणाविषे अद्य महे सुम्नाय मह आववर्तत् १
ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता हि भूतम् ।
मघोनां मंहिष्ठा तुविशुष्म ऋतेन वृत्रतुरा सर्वसेना २
ता गृणीहि नमस्येभिः शूषैः सुम्नेभिरिन्द्रावरुणा चकाना ।
वज्रेणान्यः शवसा हन्ति वृत्रं सिषक्त्यन्यो वृजनेषु विप्रः ३
ग्नाश्च यन्नरश्च वावृधन्त विश्वे देवासो नरां स्वगूर्ताः ।
प्रैभ्य इन्द्रावरुणा महित्वा द्यौश्च पृथिवि भूतमुर्वी ४
स इत् सुदानुः स्ववाँ ऋतावेन्द्रा यो वां वरुण दाशति त्मन् ।
इषा स द्विषस्तरेद् दास्वान् वंसद् रयिं रयिवतश्च जनान् ५
यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमन्तं पुरुक्षुम् ।

अस्मे स इन्द्रावरुणावपि ष्यात् प्र यो भनक्ति वनुषामशस्तीः ६
उत नः सुत्रात्रो देवगोपाः सूरिभ्य इन्द्रावरुणा रयिः ष्यात् ।
येषां शुष्मः पृतनासु साह्वान् प्र सद्यो द्युम्ना तिरते ततुरिः ७
नू न इन्द्रावरुणा गृणाना पृङ्क्तं रयिं सौश्रवसाय देवा ।
इत्था गृणन्तो महिनस्य शर्धोऽपो न नावा दुरिता तरेम ८
प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः ।
अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा ९
इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रता ।
युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये १०
इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् ।
इदं वामन्धः परिषिक्तमस्मे आसद्यास्मिन् बर्हिषि मादयेथाम् ११

(६९) एकोनसप्ततितमं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्राविष्णू देवते । त्रिष्टुप् छन्दः

सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य ।
जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता १
या विश्वासां जनितारा मतीनामिन्द्राविष्णू कलशा सोमधाना ।
प्र वां गिरः शस्यमाना अवन्तु प्र स्तोमासो गीयमानासो अर्कैः २
इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना ।
सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः ३
आ वामश्वासो अभिमातिषाह इन्द्राविष्णू सधमादो वहन्तु ।
जुषेथां विश्वा हवना मतीनामुप ब्रह्माणि शृणुतं गिरो मे ४
इन्द्राविष्णू तत् पनयाय्यं वां सोमस्य मद उरु चक्रमाथे ।
अकृणुतमन्तरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि ५
इन्द्राविष्णू हविषा वावृधानाऽग्राद्वाना नमसा रातहव्या ।
घृतासुती द्रविणं धत्तमस्मे समुद्रः स्थः कलशः सोमधानः ६
इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् ।
आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे ७
उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।

इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ८

(७०) सप्ततितमं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । द्यावापृथिव्यौ देवते । जगती छन्दः

घृतवती भुवनानामभिश्रियो र्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा १
असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते ।
राजन्ती अस्य भुवनस्य रोदसी अस्मे रेतः सिञ्चतं यन्मनुर्हितम् २
यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति ।
प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता ३
घृतेन द्यावापृथिवी अभीवृते घृतश्रिया घृतपृचा घृतावृधा ।
उर्वी पृथ्वी होतृवूर्ये पुरोहिते ते इद् विप्रा ईळते सुम्नमिष्टये ४
मधु नो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते ।
दधाने यज्ञं द्रविणं च देवता महि श्रवो वाजमस्मे सुवीर्यम् ५
ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा ।
संरराणे रोदसी विश्वशम्भुवा सनिं वाजं रयिमस्मे समिन्वताम् ६

(७१) एकसप्ततितमं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । सविता देवता । (१-३) प्रथमतृचस्य जगती, (४-६) द्वितीयतृचस्य च त्रिष्टुप् छन्दसी

उदु ष्य देवः सविता हिरण्यया बाहू अयंस्त सवनाय सुक्रतुः ।
घृतेन पाणी अभि प्रुष्णुते मखो युवा सुदक्षो रजसो विधर्मणि १
देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनश्च दावने ।
यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः २
अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशंस ईशत ३
उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात् ।
अयोहनुर्यजतो मन्द्रजिह्व आ दाशुषे सुवति भूरि वामम् ४
उदू अयाँ उपवक्तेव बाहू हिरण्यया सविता सुप्रतीका ।

दिवो रोहांस्यरुहत् पृथिव्या अरींरमत् पतयत् कच्चिदभ्वंम् ५
वाममद्य संवितर्वाममु श्वो दिवेदिंवे वाममस्मभ्यं सावीः ।
वामस्य हि क्षयंस्य देव भूरे रया धिया वांमभाजंः स्याम ६

(७२) द्विसप्ततितमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रासोमौ देवते ।
त्रिष्टुप् छन्दः

इन्द्रांसोमा महि तद् वां महित्वं युवं महानिं प्रथमानिं चक्रथुः ।
युवं सूर्यं विविदथुर्युवं स्वर् विश्वा तमांस्यहतं निदश्चं १
इन्द्रांसोमा वासयंथ उषास मुत् सूर्यं नयथो ज्योतिंषा सह ।
उप द्यां स्कम्भथुः स्कम्भंनेना प्रथतं पृथिवीं मातरं वि २
इन्द्रांसोमावहिंमपः परिष्ठां हथो वृत्रमनुं वां द्यौरंमन्यत ।
प्रार्णांस्यैरयतं नदीना मा संमुद्राणिं पप्रथुः पुरूणिं ३
इन्द्रांसोमा पक्वमामास्वन्त र्नि गवामिद् दंधथुर्वक्षणांसु ।
जगृभथुरनंपिनद्धमासु रुशंच्चित्रासु जगंतीष्वन्तः ४
इन्द्रांसोमा युवमङ्ग तरुंत्र मपत्यसाचं श्रुत्यं रराथे ।
युवं शुष्मं नर्यं चर्षणिभ्यः सं विंव्यथुः पृतनाषाहंमुग्रा ५

(७३) त्रिसप्ततितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । बृहस्पतिर्देवता ।
त्रिष्टुप् छन्दः

यो अंद्रिभित् प्रथमजा ऋतावा बृहस्पतिंराङ्गिरसो हविष्मांन् ।
द्विबर्हंज्मा प्राघर्मसत् पिता न आ रोदंसी वृषभो रोरवीति १
जनांय चिद् य ईवंत उ लोकं बृहस्पतिंर्देवहूंतौ चकारं ।
घ्नन् वृत्राणि वि पुरों दर्दरीति जयञ्छत्रूँरमित्रांन् पृत्सु साहंन् २
बृहस्पतिः समंजयद् वसूंनि महो व्रजान् गोमंतो देव एषः ।
अपः सिषांसन् त्स्वर् रप्रतीतो बृहस्पतिर्हन्त्यमित्रंमर्कैः ३

(७४) चतुःसप्ततितमं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । सोमारुद्रौ देवते ।

त्रिष्टुप् छन्दः

सोमारुद्रा धारयेथामसुर्यं१ प्र वामिष्टयोऽरमश्नुवन्तु ।
दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे १
सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश ।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु २
सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ३
तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः ।
प्र नो मुञ्चतं वरुणस्य पाशाद् गोपायतं नः सुमनस्यमाना ४

(७५) पञ्चसप्ततितमं सूक्तम्

(१-१९) एकोनविंश्यत्यृचस्यास्य सूक्तस्य भारद्वाजः पायुर्ऋषिः । (१) प्रथमर्चो वर्म, (२) द्वितीयाया धनुः, (३) तृतीयाया ज्या, (४) चतुर्थ्या आर्त्नी, (५) पञ्चम्या इषुधिः, (६) षष्ठ्याः पूर्वार्धस्य सारथिरुत्तरार्धस्य च रश्मयः, (७) सप्तम्या अश्वाः, (८) अष्टम्या रथः, (९) नवम्या रथगोपाः, (१०) दशम्या ब्राह्मणपितृसोमद्यावापृथिवीपूषाणः, (११-१२, १५-१६) एकादशीद्वादशीपञ्चदशीषोडशीनामिषवः, (१३) त्रयोदश्याः प्रतोदः, (१४) चतुर्दश्या हस्तघ्नः, (१७) सप्तदश्या युद्धभूमिकवचब्रह्मणस्पत्यादयः, (१८) अष्टादश्या वर्मसोमवरुणाः, (१९) एकोनविंश्याश्च देवा ब्रह्म च देवताः । (१-५, ७-९, ११, १४, १८) प्रथमादिपञ्चर्चां सप्तम्यादितृचस्यैकादशीचतुर्दश्यष्टादशीनाञ्च त्रिष्टुप्, (६, १०) षष्ठीदशम्योर्जगती (१२-१३, १५-१६, १९) द्वादशीत्रयोदशीपञ्चदशीषोडश्येकोनविंशीनामनुष्टुप्, (१७) सप्तदश्याश्च पङ्क्तिश्छन्दांसि

जीमूतस्येव भवति प्रतीकं यद् वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु १
धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम २
वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयं समने पारयन्ती ३
ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून् विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ४

बह्वीनां पिता बहुरस्य पुत्र श्चिश्चा कृणोति समनावगत्यं ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ५
रथे तिष्ठन् नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ६
तीव्रान् घोषान् कृरावते वृषपाणयो ऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् चिणन्ति शत्रूँरनपव्ययन्तः ७
रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।
तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ८
स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ९
ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत १०
सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ११
ऋजीते परि वृङ्धि नो ऽश्मा भवतु नस्तनूः ।
सोमो अधि ब्रवीतु नो ऽदितिः शर्म यच्छतु १२
आ जङ्घन्ति सान्वेषां जघनाँ उप जिघ्नते ।
अश्वाजनि प्रचेतसो ऽश्वान् त्समत्सु चोदय १३
अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परि पातु विश्वतः १४
आलाक्ता या रुरुशीष्ण्य थो यस्या अयो मुखम् ।
इदं पर्जन्यरेतस इष्वै देव्यै बृहन्नमः १५
अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते ।
गच्छामित्रान् प्र पद्यस्व मामीषां कं चनोच्छिषः १६
यत्र बाणाः संपतन्ति कुमारा विशिखा इव ।
तत्रा नो ब्रह्मणस्पति रदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु १७
मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम्
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु १८
यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् १९

इति षष्ठं मराडलं समाप्तम्

मन्त्रसङ्ख्या

पञ्चमराडलस्यान्तपर्यन्तं ४३६८

षष्ठमराडलस्य ७६५

सर्वयोगः- ५१३३